श्री स्वामिनारायणो विजयतेतराम् ॥

Chapter-1

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## प्रथमोऽध्यायः

(परिचयात्मकः)

## 'श्री स्वामिनारायणदर्शनाभिमतत्त्वविवेचनम्''

## प्रथमोऽध्याय:

### ०.१ उपक्रम:

प्रकृते: सौन्दर्यसम्पन्नोऽयं भारतो देश: नूनं सर्वसम्पत्समृद्धिशाली वर्तते। अत्र दृश्यते प्रकृतेर्नानाविधविचित्राभिरामसौम्यता । अत्रैव प्रकृते: षड् ऋतव: भवन्ति स्वीयसौन्दर्यसम्पन्ना: । आसीत् कश्चनकालविशेष: यदाऽत्र देशे सर्वत्र वेदानामुद्घोषो भवति स्म। सर्वे मानवा: स्वस्ववर्णाश्रमधर्मरता: साम्यौदार्यसम्पन्ना ज्ञानविज्ञानसंपन्ना अभवन् । तदाऽऽसीदयं देश: स्वेतराणां समेषां देशानां ज्ञानविज्ञानप्रदायको गुरु: । अत्रैवाऽऽगत्य सर्वे मनुष्या: स्वस्वचरित्रशिक्षामलभन्त। तथा च वक्ति भगवान् मनु: ।

**एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व मानवा:**[१] **।**

अत्रत्या एव जना: वर्णाश्रमधर्मस्य ज्ञातार: यदृच्छालाभसंतुष्टा: आत्मोज्जीवनसाधनपरायणा:, अर्थपञ्चकविज्ञातार:, भगवदाराधनादिषु स्वभावतो लब्धाधिकारा अभवन् ।

ख्रिष्टाब्दस्य बहो: कालात् पूर्वमेवाऽत्रत्या: विद्वांस आत्मचिंतनपरायणा अभवन्। अत्रैव सर्वप्रथममुद्घोषोऽभूत् यन्मोक्ष एव परमपुरुषार्थ:; तल्लाभायैव प्रयत्नानि कर्तव्यानि । एतदर्थमेवास्मिन् भारते वेदान्त-सांख्य-मीमांसा-योग-न्याय-वैशेषिकाणां दर्शनानामुद्गमोऽभूत् ।

### १.१ दर्शन शब्दस्यव्युत्पत्ति:

जगति जायमाना: सर्वे जीवा: स्वभावत एव त्रिविधसंताप समन्विता: भवन्ति। किञ्च संप्राप्तानां समेषां संतापानामपनोदाय प्रयतन्तेऽपि जना: । कृत्वा सम्यक्प्रयासं ते तस्मात् तस्मात् संतापान् मुक्ता अपि भवन्ति । तेन ज्ञायते यत् संसारे समधिगम्यमानानां दु:खादिकानां कारणानि सन्ति । तेषां तेषां कारणानां कृते सत्यपनोदने तान्यखिलान्यन्यथाकृतान्यपि भवन्ति। तदर्थं प्रयासोऽपि कर्तव्यं इममेवार्थं मनस्याकलय्य, अस्माकं वैदिक ऋषिरभिधत्ते

**'' इह चेदवेदिथ सत्यमस्ति, नोचेदवेदिथ महति विनष्टि: ''**[२] ।

अयमर्थो यद् वयं के स्म:, वयं कुत: समागता:स्म: ? संप्राप्तस्यास्य

---

१- मनुस्मृति २/२०
२-केनोपनिषत् २/५

जीवनस्य लक्ष्यं किम् ? तस्य लक्ष्यस्य स्वरूपं किमास्ते ? तस्य लक्ष्यस्य प्राप्तेः साधनानि कानि सन्ति ? तेषां साधनानामनुष्ठाने के बाधकाः भवन्ति ? केन प्रकारेण ते बाधकाः समूलमुन्मूल्यन्ते ? प्राप्यस्य प्राप्तिः कदा भवति, प्राप्यस्य प्राप्तेः फलं किम्प्रकारकं वर्तते । इत्यादिकानां प्रश्नानामुत्तरं चेदधिगतमनुष्ठितं च जीवने तदा तु मानवजीवनं सफलं संगतं, नो चेद् वैफल्यमेवास्य जीवनम् संजातम् । इत्येवोपदिशतीयं केनोपनिषदीया श्रुतिः । अन्यापि श्रुतिरभिधत्ते कठोपनिषदः ।

**उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत ।**
**क्षुरस्य धारा निशितादुरत्यया दुर्गं पथः तत् कवयो वदन्ति ।**[१]

जगत्यस्मिन् द्वन्द्वायमाणाः हतोत्साहाः दुःखमेवास्माकीना नियतिरितिमन्यमानाः जनाः ये सन्ति तानुत्साहसम्पन्नान् कुर्वन्तीयं श्रुतिरभिधत्ते मानवाः कथं सन्ति भवन्तोऽनुत्साहिता, आलस्यं विहाय भवन्तु कर्मसज्जाः । ज्ञानिनो जनान् सम्प्राप्य, तेषां शुश्रूषयात्मोज्जीवनसाधनविषयकाः सम्प्राप्तज्ञानाः भवन्तु । सावधानतया कुर्वन्तु ज्ञानार्जनम्, तथैव कृते भवतां जीवनं सफलं भविष्यति ।

एतेषां-वचसामालोक एव स्वकीयानां समस्यानां समाधानं कामयमानानां जीवानां समुचितमुत्तरं दर्शनेनैव लभ्यते, नेतरेण साधनेनेति ज्ञानिनः पुरुषाः समुचिदाधिकारिण उपदिशन्ति ।

अत्रायं स्वाभाविकः प्रश्न उदेति, किं नाम दर्शनम् ? दर्शनपदार्थः कः ? इत्यत्रोच्यते दर्शनशब्दस्यार्थः । दर्शनशब्दोऽयं द्वेधाव्युत्पद्यते करणे भावे च । यदा "दृश्" धातोः "करणाधिकरणयोश्च"[२] इति सूत्रेण ल्युट्प्रत्यये आनुन्धलोपे च कृते, "युवोरनाकौ"[३] इति सूत्रेण चानादेशे कृते सति, गुणे च कृते यदा दर्शनशब्दो व्युत्पद्यते तदा तस्यार्थः दर्शनसाधनं भवति । अस्मिन्नर्थे-मानवजीवनोन्नयनसाधनानां साक्षात्कारस्य साधनभूतमेवज्ञानं दर्शनमिति भवत्यभिहितमिति दर्शनशब्दस्यार्थो जायते । यदा च "भावे च,"[४] इति सूत्रेण भावार्थे ल्पुट्प्रत्ययं कृत्वा दर्शनशब्दो व्युत्पाद्यते तदा ' आत्मोज्जीवनसाधनभूतानि तत्त्वानि एव दर्शनशब्देनाभिधीयन्ते ।

ईममर्थद्वयमेव मनसि कृत्वा दर्शनशब्देन सर्वे दार्शनिकाः आत्मकल्याणस्य साधनभूतानां ज्ञानानां, किञ्चात्मकल्याणस्य साधनभूतानां तत्त्वानां प्रतिपदानं कुर्वन्ति ।

---

१- कठोपनिषत् ३/१४ ३- पाणिनि सूत्र ७/१/१
२-पाणिनि सूत्र ३/३/११७ ४- पाणिनि सूत्र ४/४/१४४

## १.२ दर्शनस्यवैशिष्ट्यम्

भारतीय धर्मशास्त्रकारेषु मनोर्नाम सर्वप्रथमं गृह्यते । सर्वे भाष्यकारा अप्येनं

भगवान् मनुरिति वदन्ति। अत्र समादरातिशयबोधकोऽयं भगवान् शब्दः। सोऽयं भगवान् मनुः दर्शनशब्दं सम्यग्दर्शनशब्देनाभिधत्ते। सः प्राह–सम्यग्दर्शनं लब्धवा वा समुपलभ्य मानवोऽस्मात् संसारबन्धाद्विमुच्यते । दर्शनाऽभावे संसारावर्ते निपतति। तथाहि

**सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबद्धयते ।**
**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥**[१]

इति अत एव दर्शनज्ञानं मानवजीवनस्यात्यावश्यकं विद्यते । तदिदं दर्शनं विभिन्नवैशिष्ट्यविशिष्टं भवति। तथाहि

**१.२.१. सर्वविद्या प्रतिष्ठास्वरू पम्** – दर्शनस्यापरं नामाध्यात्मविद्या वर्तते। आत्मनि इत्येर्थे एवाध्यात्म शब्दो व्युत्पद्यते। आत्मानमधिकृत्य प्रवृत्तोऽयं विद्याशब्दः आत्मशब्दः जीवात्मपरमात्मनोरुभयोरेव बोधकः । इयमेव विद्या सर्वासां विद्यानां प्रतिष्ठायै भवतीति प्राहास्माकमृषिः । तथाहि

**'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह'**[२]।

इति । अस्याः विद्यायाः प्रंशसां कुर्वन् भगवान् श्रीकृष्णो गीतायां स्वयमेवाभिधत्ते ।

**''अध्यात्मविद्याविद्यानां वादः प्रवदतामहम् ।''**[३]इति ।

इयं विद्या परमात्मस्वरूपिणी वर्तते । येन प्रकारेण परमात्मानमवाप्य मानवः शाश्वतीं शान्तिमधिगच्छति; तेनैव प्रकारेण दर्शनमधीत्यानुष्ठाय च जीवने साधनानि शाश्वतीं शान्तिमवाप्नोति । एतस्मादेव कारणात् कौटिल्यः विद्यामेनां सर्वासां विद्यानां प्रदीपं वक्ति ।

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकीमता ।**[४]'' इति ।

**१.२.२. अविछिन्नपरम्परा**– भारतवर्षे दर्शनानां परम्परा अविछिन्ना वर्तते। कदाप्यस्य प्रवाहः प्रतिरुद्धो नहि भवति।अस्माकमृषय आचार्याश्च तेषां तत्त्वानां साक्षात्कारं स्वकीयया ऋतम्भरया प्रज्ञयाऽद्राक्षिषुः, तेषामुपदेशः स्वशिष्यायावश्यं ददुः। किञ्च स्वोपज्ञज्ञानस्य प्रचाराय प्रसाराय च त आजीवनं प्रयासमप्यकार्षुः। अत एव दर्शनशास्त्रस्य–परम्परास्मिन् देशे शिष्याचार्यपरम्परा, इदानीं यावदक्षुण्णा

---

१- मनुस्मृति ६/७४
२-मुण्डकोपनिषत् १/१/१
३-भगवद् गीता १०/३२
४-अर्थशास्त्रम् १/२

वर्तते। एतस्मादेव कारणाद् भारते वर्षे दर्शनानां सर्वाधिकं सम्मानं वर्तते।

**१.२.३ दर्शनाधिकारिषु नैश्चित्यस्याधानम्** -भारतीयं दर्शनं नैश्चित्यस्योपदेशं करोति स्वाधिकारिभ्यः। भारतीया ये केचन दार्शनिका अभवन्, ते संसारसंचिन्तनाद् विरक्ताः संरक्ताश्च तत्त्वचिन्तनेऽभूवन्।

**१.२.४ विवेचनात्मकता**-भारतीयं दर्शनं स्वाभिमतानां तत्त्वानां सम्यक्तया विवेचनं करोति, सांख्यदर्शनं प्रकृतेः पुरुषस्य च स्वरूपसंबन्धादिकानां विवेचनं विस्तरेण कृत्वा संसारविमुक्तेः साधनस्योपदेशं करोति। अनेनैव प्रकारेण वैशेषिकं दर्शनं सप्तपदार्थानां विस्तरेण विवेचनं कृत्वा तज्ज्ञानेन परंशान्त्यवाप्तेः समर्थनं करोति। न्यायदर्शनं षोडषपदार्थानां विवेचनं कृत्वा विस्तरेण वक्ति यदेतेषामेव तत्त्वानां तात्त्विकज्ञानेन संसाराद् भवति विमुक्तिः। वेदान्त दर्शनमपि वक्ति -

**"भोक्ताभोग्यं प्रेरितारं च मत्त्वा जुष्टस्ततस्तेनामृतत्त्वमेति।"**[१]

इत्थं स्पष्टं जातं यद् भारतीय दर्शनं विवेचनात्मकं विद्यते। इत्थमनेक प्रकारकं वैशिष्ट्यविशिष्टं वर्तते भारतीयं दर्शनम्।

## १.३ दर्शनस्योद्भवः

भारतीयदर्शनोद्भवः दुःखानां जिहासया भवतीतीश्वरकृष्णः सांख्य कारिकायां वक्ति -

**दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।**
**दृष्टे साऽपार्थाचेन्नैकान्तिकात्यन्ताभावात्॥**[२]

इति कारिकयैव ज्ञायते। किञ्च भारतीयदर्शनस्योद्भवः परंतत्त्वस्य स्वरूपस्य भावादिकस्य च ज्ञानाय अभवत्। अत्र सर्वेषां दर्शनानामेकमेव लक्ष्यं दृश्यते। तदस्ति मानवजीवनस्योज्जीवनसाधनानां गवेषणा। अत एवादावन्ते च तस्यैव कीर्तनं कृतं भवति सर्वेषु दर्शनेषु।

नास्तिकानामास्तिकानां च समेषां दर्शनानामियमेव स्थितिः।

## १.४ दर्शनद्वैविध्यम्

सर्वेषां भारतीयानां दर्शनानां मुख्यतः द्वावेव विभागौ भवितुमर्हतः - नास्तिकदर्शनानि, आस्तिकदर्शनानि च।

दर्शनशास्त्राणां सम्यग् पर्यालोचनाज्ज्ञायते- भारतीयं दर्शनं सर्वाङ्गपरिपूर्णं वर्तते। तत्राऽऽचारविचारसुखदुःखहर्षशोकबन्धमूलह्रासविकासमंत्रयंत्रसमेषां विषयाणां विशदं विवेचनं वर्तते। दर्शनमनुभूतिविषयत्वेनैकमेव,

---

१- श्वेताश्वतरोपनिषद् १/१२ २- सांख्यकारिका १

तथापि यस्मिन्दर्शने यस्य भवेद् वैशिष्ट्यं तद्दर्शनं तद्विषयकमिति वक्तुं शक्यते। अतः भौतिकं (वैज्ञानिकं) दर्शनं, आध्यात्मिकं दर्शनमिति द्वैविध्यं वक्तुं शक्यते।

भौतिकं नाम पाञ्चभौतिकं दर्शनम् । यस्मिन् सूर्यादिग्रहनक्षत्रतारकाणां स्थानगत्यादीनां निर्णयो वर्तते । यस्मिंश्चास्ति ज्योतिषादीनां प्रतिपादनम् ।

अन्यद्द्वितीयमाध्यात्मिकं दर्शनशास्त्रमस्ति, यस्मिन् समेषां आन्तरिकावस्थायाः वर्णनं वर्तते । शरीरेन्द्रियमनप्राणादूर्ध्वमात्मपरमात्मविषयकं वा चिन्तनं वर्तते, तदस्त्यध्यात्मदर्शनम् ।

किन्तु प्रायः समैः दार्शनिकैः दर्शनस्य द्वैविध्यं नोक्तप्रकारेण वर्णितम् । प्रायः नास्तिकास्तिकभेदेन द्वैविध्यं प्रतिपाद्यते ।

आस्तिकनास्तिकभेदस्तु श्रुतिपरंपरानुकरणं तद्विमुखपथानुगमनरूपेणैवेति भगवान् मनुः । भौतिकं अध्यात्मिकञ्चेति दर्शनद्वैविध्यं प्राह डो. सर्वपल्ली राधाकृष्णन् स्वग्रन्थे ।[1]

मन्त्रद्रष्टृभिः ऋषिभिर्ऋग्वेदमुखेषु दार्शनिकी स्तुतिर्कृता । वेदोक्तं - ऋषभिर्गीतं दर्शनं संज्ञारहितमासीत् । ततः कालान्तरेण केचिद् केचिदाचार्याः स्वमतानुकूलार्थव्यवहारश्चक्रुः । तेषामर्थव्यापारादसंतुष्टा वा देहात्मभावदार्ढ्याद् केचिद्वेदनिन्दका अभवन् । वेदोक्तविधिनिषेधकार्याकार्यनिर्णयमेव न ह्यपि तु वेदानपि खण्डयामासुस्ते ।

तत एव तेषां पार्थक्यं प्रथितं वैदिकेभ्यः । आचारस्वातन्त्र्यं विचारस्वातन्त्र्येण साकं विलोक्य बहवः सुधियः तदनुजग्मुः । फलतः चार्वाक-बौद्ध-जैनेति नास्तिकदर्शनानां प्रादुर्भावः ।

श्रौतं तार्किकञ्चेति द्विविधं दर्शनमिति डो. उमाशंकर शर्मा ''ऋषि'' सर्वदर्शनसंग्रहोपोद्घात प्रकरणे (पूर्वपीठिकाप्रकरणे) प्रत्यपीपदत् । अत्रास्तिक-नास्तिकभेदेन दर्शनशास्त्रस्य समासेन वर्णनं प्रस्तूयतेऽधस्तान्मया ।

## १.५ नास्तिकदर्शनानि

नास्तिकानि तान्येव दर्शनानि सन्ति, यानि वैदिकेषु प्रमेयेषु नहि विश्वसन्ति। वेदानां, वेदप्रमेयाणां च निन्दां कुर्वन्ति ।

एतादृशानि षट् संख्याकानि सन्ति-

१. देहात्मवादिचार्वाक् दर्शनम् । ४. प्राणात्मवादिचार्वाक् दर्शनम् ।
२. इन्द्रियात्मवादिचार्वाक् दर्शनम् ।५. जैनदर्शनम् ।
३. मन आत्मवादिचार्वाक् दर्शनम् ।६. बौद्धदर्शनञ्च ।

न चात्र वाच्यं येन प्रकारेण चत्वारि सन्ति चार्वाक्दर्शनानि, तेनैव प्रकारेण

---

१- भारतीय दर्शन भाग -१ पृष्ठ-----

बौद्धदर्शनमपि चतुर्धा विभक्तुं शक्यते ।

१. वैभाषिक बौद्धदर्शनम् । ३. योगाचारबौद्धदर्शनम् ।
२. सौत्रान्तिकबौद्धदर्शनम् । ४. माध्यमिक बौद्धदर्शनम् ।

अत्रोच्यते चतुर्णां चार्वाकाणां ये सम्प्रदायाः सन्ति, त एतस्मादेव कारणाद् भिद्यन्ते यतस्तेषां लक्ष्यं भिन्नं भिन्नं वर्तते । देहात्मवादीचार्वाको देहस्यैवात्मत्वं प्रतिपादयति, इन्द्रियात्मवादी चार्वाक् इन्द्रियाणामेवात्मत्वं कामयते । मन आत्मवादी चार्वाक् मनस एवात्मत्वं कामयते । प्राणात्मवादी च प्राणस्यैवात्मत्वं मन्यते ।

किन्तु बौद्धानां यद्यपि सन्ति चत्वारः सम्प्रदायाः, परन्तु ते सर्वे समानरूपे; अनित्यस्यैव ज्ञानस्यात्मत्वं स्वीकुर्वन्ति । फलतः तेषामेकमेवदर्शनं बौद्धदर्शनमिति ।

येन प्रकारेण नास्तिकदर्शनानि षट्संख्यकानि सन्ति, तेनैव प्रकारेणास्तिकान्यपि दर्शनानि षट् सन्ति ।

१. न्याय दर्शनम् । ४. योग दर्शनम् ।
२. वैशेषिक दर्शनञ्च । ५. मीमांसा दर्शनम् ।
३. सांख्य दर्शनम् । ६. वेदान्त दर्शनम् ।

**'वेदोऽखिलोधर्ममूलम्'**[१] इति भारतीयजनपरिव्याप्तभावनायाः व्युत्खननपूर्वकतर्कबलेनाचारस्वातंत्र्यप्रतिपादकाः चार्वाक्बौद्धजैनमताः । चार्वाक्भिन्नत्वेऽपि बौद्धजैनयोरपि वेदविरुद्धत्त्वेन साम्यम् । अवैदिकदर्शनं प्रथम मुपनिषदुत्तरकालाद् उद्भूतम् । अक्रियायदृच्छानियतिवादानां उपजीव्योऽयं सन्देहवादः । वेदप्रामाण्यनिर्णयदुर्बलत्त्वेऽपि पञ्चमवेदरूपस्य महाभारतस्य रचनां चकार वेदव्यासस्तथापि सन्देहवादप्राबल्येन तस्य वृद्धिर्नावरुद्धा । वेदोक्त धर्मस्य व्यवहाराध्यात्मयोरुभयोर्खण्डनं कृत्वा भुतात्मवादं प्रथयामासुः ।

प्रथमावस्थायामेते तथ्यवेत्तारो ज्ञानिन इति जनश्रुतिः कर्णपरम्परया सर्वत्र वायुवद् व्याप्ताऽभवत्तथापि न कोऽपि भूतात्मवादानुकरणेनेप्सितार्थं जगाम । फलतः यावदपेक्षितं तावन्नास्य लोकप्रियत्वमभूत । तस्मिन्नैव काले लोकहृदयव्यथां ज्ञात्त्वोपनिषदुक्तविचारावलम्बनं कृत्वा बौद्धजैनयोः प्रादुर्भावोऽभुत । श्रुतिपरंपरानुकरणेऽपि कुत्रचित्स्वमतसौष्ठवप्रदर्शनाय श्रुतिं तिरश्चकार । जरामरणमोक्षरूपो यददार्शः श्रुतिषु ऋषिभिर्प्रतिपादितं तदेव महावीरबुद्धयो अभिप्रेतमासीत् । सांसारिकदुःखाद् विमुक्तिरेव प्राधान्येन सर्वेषां प्रिया । बौद्धजैनयोः ईषदास्तिकवद् व्यवहाराद्विभ्रान्ताः मानवाः । वस्तुत उभयो उदयवेलायामधिकं विरुद्धत्वं नासीत्, किन्तु कालान्तरेण भाष्यटीकाग्रन्थकारेण

---

१-मनुस्मृति २/६

सम्पूर्णमवैदिकमिदं मतमिति प्रस्थापितमिति वदन्ति केचित्तु न सम्पूर्णं सत्यम्। श्रुतिविरुद्धत्वादेव तेषामवैदिकत्वं संगीरन्ते वैदिकाः ।

## १.६ चार्वाक्दर्शनम्

(१) अवैदिकदर्शनेषु प्रथममिदं दर्शनं वर्तते। ''लोकायत'' इति प्राचीना संज्ञाऽस्यैव दर्शनस्य। वैतण्डिक इमे इत्यपि केचित्। बार्हस्पत्यदर्शनम्'' इति दार्शनिकाः । चार्वाक् इति समे । जडलोकवदाराचाल्लोकायतम्, तर्कबलेन वेदखण्डनत्वाद् वैतण्डिकम्, बृहस्पतिनोपदिष्टत्वात्- बार्हस्पत्यम्, बृहस्पति शिष्य चार्वाकेण प्रथितत्त्वात् चार्वाक् इति ।

(२) प्राय आपाततो दर्शनव्याचक्षाणः केवलं पूर्वपक्षरूपेणैव चार्वाक् सिद्धान्तास्तिर्न तेषां स्वतंत्रग्रन्था इति वदन्ति, तत् सत्यादपेतम् । बृहस्पति सूत्राणामुल्लेखो ब्रह्मसूत्रगीताभाष्याऽऽदिकेषु ग्रन्थेषु प्राप्यते । अधस्तात् कानिचित्सूत्राणि लिख्यते

(१) मरणमेवापवर्गः ।

(२) काम एवैकः पुरुषार्थः ।

(३) चैतन्यविशिष्टः कायः पुरुषः ।

(४) किण्वादभ्यो मदशक्तिवद् विज्ञानम् ।

(५) पृथिव्यप्तेजोवायुरिति तत्त्वानि ।

इत्याद्यष्टसूत्राणि भारतीयदर्शने आचार्येण बलदेवोपाध्यायेनोल्लेखितानि। चार्वाक्दर्शनस्येमानि सर्वस्वभूतानि सूत्राणि सन्ति ।

**होहन्तेर्ञ्णिन्नेषु**[1] - इति सूत्रस्य महाभाष्ये ''भागुरु'' टीका ग्रन्थस्योल्लेखः प्राप्यते चार्वाकाणाम्। वर्णिका व्याख्यात्री भागुरी टीका विशेषः इति कैयटः । ''वर्णिका भागुरी लोकायतस्य'' इति महाभाष्यम् । भट्ट जयराशि विरचितः ''तत्त्वोपप्लवसिंह'' चार्वाक् मतस्य प्रतिपादको ग्रन्थः। प्रायः ब्रह्मसूत्रभाष्येषु न्यायमञ्जर्यां विवरणप्रमेय संग्रहे सर्वसिद्धान्तसंग्रहे सर्वमतसंग्रहे षड्दर्शनसमुच्चये तट्टीकायां च चार्वाक्मतस्य समालोचनं कृतं वर्तते । श्रीमद्यामुनाचार्यस्तु आत्मसिद्धौ चतुर्विधानां चार्वाकाणां मतानां खण्डनमकार्षत्। वेदान्त देशिकाचार्यः तत्त्वमुक्ताकलापे, न्यायसिद्धाञ्जने चापि चार्वाक् मतस्य विशेषं खण्डनमकरोत्।

(३) तत्त्वमीमांसा-

पृथिव्यप्तेजोवायुरिति तत्त्वानि सम्मतानि चार्वाक् दर्शने । बौद्धवदाकाशस्यशून्यत्वमेवाङ्गीकुर्वन्ति तद्दर्शनविदः। उक्ततत्त्वचतुष्टय-

१- व्याकरण सूत्रम् ७/३/५४

जगदुत्पत्ति हेतवः । जगदिदं लोकव्यवहारसिद्धम् । श्रीमद्भगवद्गीतायां षोडशाऽध्याये भगवता श्रीकृष्णेनापि

**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।**
**अपरस्परसम्भूतं किमन्यत्कामहेतुकम् ॥** [1]
**चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।**
**कामोपभोगपरमा एतावदिति निश्चिताः ॥** [2]
**आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः ।**
**यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥** [3]

इत्यादिना चार्वाकानामेव मतं प्रतिपादितं नामोल्लेखं विना । श्रीभाष्ये रामानुजाचार्योऽपि ''अदृष्टदेहातिरिक्तात्मानः'' इत्युक्त्वा चार्वाकानामेव निर्देशं करोति ।

जीवतत्त्वमस्वीकुर्वन्ति ते । 'चैतन्यविशिष्टः कायः पुरुषः' इति तेषां प्रथितो भूतचैतन्यवादः । चैतन्यं नाम किं तत्त्वमिति चेत् ज्ञानादितत्त्वंनापि तु'' किण्वादिभ्यो मद शक्तिवत् विज्ञानम्'' भूतचतुष्ट्य संयोगादुत्यन्नधर्मविशेष एवात्मा । ताम्बूलपूगचूर्णयोगोत्थित रक्तिमावदात्मोत्पद्यते ।

जगज्जनित्राणविनाशहेतुत्वेनेश्वरस्य सिद्धिर्भवति । श्रुतिवाक्यानां शब्दाप्रामाण्यवदतां चार्वाकानां न कश्चिद् वैशिष्ट्यम् । फलतः श्रुत्युक्त जगदुत्पत्तिस्थितिप्रलयकारणरूपेणेश्वस्य सिद्धिं न स्वीकुर्वन्ति । न चानुमानिकीं ईश्वरसिद्धिं नैयायिकवदङ्गीकुर्वन्ति । शब्दानुमानयोरपि प्रामाण्यास्वीकरात् । जगत उत्पत्तिः स्वाभाविकी एव । अत एवैते स्वभाववादिन इत्यपि दर्शनदक्षां वचः । जगदुत्पद्यते विनश्यति चातो न कोऽपि कर्तेति तेषां सिद्धान्तः ।

चार्वाकस्य स्वतंत्रतत्त्वमीमांसा–आचारमीमांसा च सर्वेभ्यः भिन्ना । चार्वाक् दर्शनदक्षानां परमतखण्डन एवाग्रहो दृश्यते, न तु स्वमतस्थापने । आचारस्वातंत्र्यं तु

**यावज्जीवेत् सुखं जीवेद्, ऋणं कृत्वा घृतं पिबेत् ।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥**

इति सर्वजनविदितोक्तिर्प्रसिद्धा । जगदतिरिक्तं तत्त्वं नास्ति, देहातिरिक्तमात्मा नास्ति, प्रत्यक्षातिरिक्तं प्रमाणं नास्ति; अत धर्मार्थकाममोक्षाख्यपुरुषार्थाय यद्वा स्वर्गादिप्राप्त्येषणया धर्माद्यनुष्ठानं–यज्ञानुष्ठानं च सम्यग् तर्कासीना कीर्तितम् । मरणमेवापवर्गः । देहत्याग एव मुक्तिः । अतो नाचारविचारनिग्रहस्य

---

१- भगवद् गीता १६/८ ३ -भगवद् गीता १६/१७
२- भगवद् गीता १६/११

करणीयत्वमिति सिद्धान्तः । विस्तरेण सर्वदर्शनसंग्रहे प्रथम प्रकरणे दृष्टव्यम्।

## चार्वाकमतसमीक्षणम् ।

दार्शनिकैः शतमुखैः निन्दितमिदं दर्शनम्। भूतात्मवादस्वभाववादयोरपि वैदिकानां तीव्रतर्काद् दौर्बल्यम्। प्रत्यक्षेणैव सर्वव्यवहारनिर्वाहोऽपि नैव सम्भवः। अत्रेदं विशेषेण ज्ञातव्यं यत् -बृहस्पतिना नोक्तं कुत्रापि -ऋणं कृत्वा घृतं पिबेदिति। तत्तु तन्नाम्नाऽऽक्षेपितमेव। बृहस्पतिस्तु बहुश्रुतो वैज्ञानिक आसीत्।

बृहस्पत्युक्तवचनानामयमाशयः-आप्तेष्वन्धविश्वासो न कर्तव्यः। श्रद्धया सिद्धान्तपुष्टिर्न भवत्यपि तु तर्केणैव सिद्धान्तसिद्धिर्भवति । दर्शनजगति अन्धविश्वासस्यापेक्षयाधिकं ज्यायान्नविश्वासः। दर्शनजगति तर्कोपस्थस्य श्रेयः चार्वाकानामित्यपि वक्तुं शक्यते। तैस्तर्कानुगृहीतमेव तत्त्वं स्वीकृतम्। वस्तुतः सर्वत्र चार्वाकमतानुयायिन एव दृश्यन्ते, प्रच्छन्नाः चार्वाकः सर्वे। समाजजीवन-पर्यालोचनं तटस्थरूपेण क्रियते चेत्तर्हि दर्शनस्यास्य प्राबल्यम्। यज्ञीयहिंसा-तर्जनादिकं तत्रापि सौष्ठवमस्ति।

-देहेन्द्रियमनप्राणात्मवादीनां चार्वाकानां सिद्धान्तमीमांसा द्वितीयाध्याये जीवनिरूपणावसरे करिष्यामः ।

## १.७ जैनदर्शनम्

नास्तिकदर्शनेषु जैनदर्शनस्य द्वितीयं स्थानं वर्तते। दर्शनस्यास्य साहित्यमपि विस्तृतं वर्तते। दर्शनस्यास्य भाषा दार्शनिकापेक्षया वैज्ञानिकाऽधिकतरा वर्तते। उमासरस्वती उमास्वामि कृतं "तत्त्वार्थाधिगमसूत्रम्" सर्वप्रथमः प्रामाणिको ग्रन्थो विद्यते।

जैनाः ज्ञानं पञ्चप्रकारकं स्वीकुर्वन्ति।

(१) मतिज्ञानम् - मनस इन्द्रियेभ्यश्च जायमानं ज्ञानम्। अत्रैव तर्क-स्मृति-प्रत्यभिज्ञानामप्यन्तर्भावो भवति।

(२) श्रुतिज्ञानम् - शब्देभ्यः संकेतेभ्यश्च जायमानं ज्ञानम्। ज्ञानमिदं भवति द्विप्रकारकं शास्त्रीयमशास्त्रीयमिति च।

(३) अवधिज्ञानम् - दिव्यदृष्ट्या जायमानं त्रैकालिकं ज्ञानमिदमास्ते।

(४) मनःपर्यायम्-अन्येषां भावनानुसारेण जायमानं साकारं ज्ञानम्।

(५) केवलज्ञानम् -मुक्तजीवानामिदं ज्ञानं वर्तते।

एतेषु ज्ञानेषु प्राथमिकानि त्रिप्रकारकानि ज्ञानान्यसत्यानि-अपूर्णानि च भवितुमर्हन्ति, किन्तु द्वेऽन्तिमे ज्ञाने सत्ये पूर्णे च भवतः । असत्यताया अपूर्णतायास्तयोरवसर एव न हि भवति। तथा चात्र तत्त्वार्थसूत्रम्।

मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम् – जैनदर्शनानुसारेणात्माऽदिरिति स्वीक्रियते। एतन्मतानुसारेण सप्तप्रकारकानि सन्ति तत्त्वानि। (१) जीवः (२) अजीवः (३) अस्रवः (४) बन्धः (५) संवरः (६) निर्जरः (७)मोक्षश्च। तथा च तत्त्वार्थसूत्रम् "**जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षस्तत्त्वम्**" इति। एतान्यधस्तान्निरूप्यते।

(१)**जीव** – संसारदशायामात्मैव जीवशब्देनाभिधीयते। जीव इन्द्रियेण, शरीरेण, मनसः शक्त्या च युक्तः प्राणवान् भवति्। जैनदर्शनः परिणामवादमभ्युपगच्छति। अत एव प्रत्येकं वस्त्वेकं स्वरुपं विहायान्तरस्वरूपं स्वीकरोति। जीवेन द्वारा क्रियमाणाः सर्वाः क्रियाः कर्मफलानि सन्ति। एतन्मतानुसारेण, शरीरपरिमाणको जीवो भवति। कर्मबन्धनाद् विनिर्मुक्तः जीवो सम्यक् ज्ञानमुत्पद्यते। अयमप्यन्यद्रव्यवत् सावयवः, प्रदेशयुक्तश्च वर्तते। प्रतिक्षणं तस्य धर्माः परिवर्तिताः भवन्तिः, जीवस्य मुख्यौ द्वौ गुणौ भवतः। चेतना, तस्य उपयोगश्च।

**( २ )अजीवतत्त्वम्**-येषामजीवानां शरीरं भवति तेऽजीवकाय-शब्देनाभिधीयते। अजीवा व्यापका अनेकप्रदेशवन्तश्च भवति। अजीवानां चत्वारो भेदाः भवन्तिः (१) धर्मः (२) अधर्मः (३) आकाशः (४) पुद्गलाश्च। तथा च तत्त्वार्थसूत्रम्। "**अजीवकायाः धर्माधर्माकाशपुद्गलाश्चे**" ति। पञ्चम अजीवः कालोऽस्ति जैनमतानुसारेण। अस्यैक एव प्रदेशोऽत एवाजीवकायो नास्त्ययम्।

**( ३ ) आस्रवतत्त्वम्**- कर्मपुद्गलानां योगेन यो हि जीवे प्रवेशो भवति स एवास्रवेत्यभिधीयते। अस्रवस्यैव सम्बन्धेन जीवः कर्मबन्धगतो भवति। अस्रवस्य द्वौ भेदौ भवतः, भावास्रवः,द्रव्यासवश्च। जीवेषु पुद्गलः द्विचत्वारिंशत्प्रकारेण प्रविशति। एतेषु सप्तदशसंख्याकाः गौणाः, अवशिष्टाश्च पंचविंशतिसंख्याकाः गौणाः सन्ति।

**( ४ ) बन्धतत्त्वम्**- जीवेषु पुद्गलानां प्रवेशात्प्राक् ये तस्मिन् भावास्रवाः भवन्ति, तदनन्तरमुत्पद्यमानं बन्धं भावतत्त्वमित्यभिधीयते। कर्मपुद्गलानां जीवने प्रवेशानन्तरं द्रव्यास्रव उत्पद्यते। तस्मादेव भवति बन्धनम्। तदेव द्रव्यबन्ध इत्यभिधीयते। आस्रवस्य सम्पर्केणैव जीवस्य स्वरूपं नश्यति।

**( ५ ) संवरतत्त्वम्**- अन्यदर्शनमिव जैनदर्शनस्यापि लक्ष्यं मुक्ते रवाप्तिर्वर्तते। अत एव कार्मिकाणां पुद्गलानां जीवे प्रवेशान्निरोध-आवश्यको भवति।

इयमवरोधस्यैव क्रिया संवरद्रव्यमित्यभिधीयते। संवरेण जीवेषु

रागमोहादिकानामुत्पत्तिर्न हि भवति । मुच्यते च बन्धनाज्जीवः ।

**( ६ ) निर्जरातत्त्वम्**- संवरोपयोगीनां द्वाषष्ठिसाधनानां स्वीकारेण जीवे नवीनानां कर्मपुद्गलानां प्रवेशो निरुध्यते, किन्तु तस्मात् पूर्वमेव ये कर्मपुद्गलाः जीवे प्रविश्य तस्मिन् संसक्ताः संजाताः, तेषामतिनाश आवश्यको भवति । इयं नाशकरणस्य प्रक्रियैव निर्जरेत्यभिधीयते ।

**( ७ ) मोक्षतत्त्वम्**- कर्मपुद्गलानां नाशे संजाते जीवः सर्वज्ञः बन्धनमुक्तश्च भवति । अस्यैव नाम मोक्षोऽस्ति ।

जैनाः त्रिणि प्रमाणानि स्वीकुर्वन्ति – प्रत्यक्षानुमानशब्दश्चेति । प्रत्यक्षमपि द्विप्रकारकं भवति पारमार्थिकं, व्यावहारिकञ्च ।

जैनानां नये त्रयो वादाः (१) कर्मवादः(२)परिणामवादः (३) सप्तभङ्गीवादश्च । तृतीयस्यापरसंज्ञा स्याद्वाद इत्यपि । वादस्यास्य सर्वे दार्शनिकाः समालोचनमकार्षुः । जैनानां सप्तभङ्गीवादस्य स्वरूपं निम्नांकितं वर्तते । तद्यथा –

(१) स्यादस्ति द्रव्यम् ।
(२) स्यान्नास्ति द्रव्यम् ।
(३) स्यादस्ति च नास्ति च द्रव्यम् ।
(४) स्याद् वक्तव्यं द्रव्यम् ।
(५) स्यादस्ति चावक्तव्यं च द्रव्यम् ।
(६) स्यान्नास्ति चावक्तव्यं च द्रव्यम् ।
(७) स्यादस्ति च नास्ति चावक्तव्यं द्रव्यम् ।

जैनदर्शनस्येमे विषयाः पर्यालोचनीयाः सन्ति । अत एवान्येऽपि समालोचकाः जैनदर्शनस्यैतेषामेव विषयाणां चर्चामकार्षुस्तत्र तत्र ।

## १.८ बौद्धदर्शनम्

बौद्धदर्शनं नास्तिकदर्शनानां निकाये तृतीयं स्थानं बिभर्ति । पूर्वं त्वस्यापि दर्शनस्य जैनदर्शनवदाचारशास्त्रीयमेव स्वरूपमासीत्, किन्तु कालान्तरेणास्य स्वरूपं दार्शनिकं बभूव ।

बौद्धदर्शने चतुर्णामार्यसत्यानां स्थानमतिमहत्त्वपूर्णमास्ते । तानि चत्वारि आर्यसत्यानि निम्नांकितानि सन्ति ।

(१) सर्वदुःखम् – संसारोऽस्ति दुःखमय इत्यर्थः ।

(२) दुःखसमुदायः– दुःखानामस्ति कारणम् ।

(३)दुःखनिरोधः – यतो जनाः दुखैर्पीडिता, तेषां नाशस्य साधनान्यन्विषन्ति, ततो ज्ञायते यत् ते जनाः दुःखानां नाशे विश्वसन्ति इति ।

(४) दुःखनिरोधगामिनीप्रतिपत्तिः - दुःखनिरोधस्योपायाः सन्तीति ।

एतेषामेवार्यसत्यानां जनेषु प्रचाराय बुद्धः बौद्धानादिशत् । सर्वप्रथमं बुद्धेनोक्तं यत् संसारः दुःखमयोऽस्ति । तन्नाशस्योपायाः कर्तव्याः । दुःखनाशात् प्राक् तस्य कारणानां ज्ञानमावश्यकमास्ते । यत् कारणस्य नाशं विना कार्यं समूलं न हि नश्यति । बुद्धो दुःखस्य कारणमविद्यामाह । अविद्यया उद्भूतशक्त्या समुत्पद्यन्ते कारणानामेका परम्परा । अस्याः परम्परायाः आश्रयीभूतानि त्रयोदशसंख्याकानि निम्नांकितानि तत्त्वानि सन्ति ।

(१) अविद्या (२) संस्कारः (३) विज्ञानम् (४) नामरूपे (५) षडायतनम् (६) स्पर्शः (७)वेदना (८) तृष्णा (९) उपादानम् (रागः ) १०) भवः (११) जातिः (१२) जरा (१३) मरणञ्च । इमान्येव तत्त्वानि भवचक्रशब्देनाभिधीयन्ते । असंङ्गमार्गेण भवितुमर्हति भवचक्रस्य नाश इति ।

**बौद्धानां मतविभाग : ।**

एतेषामेवार्थानां बोधनाय विशालस्य बौद्धसाहित्यस्य संकलनमभूत् । तदनन्तरं बौद्धानां मतविभागोऽभवत् । सर्वप्रथममस्य मतस्य द्वौ विभागावभूताम्- महासंधिकस्थविरवादश्च । प्रत्येकस्मिन् व्यक्तौ बुद्धत्वप्राप्तेः स्वाभाविकी शक्तिर्वर्तते इति महासंधिकाः प्राहुः । स्थविरवादिनश्च स्वकीयायां परम्परायां किमपि प्रकारकं परिवर्तनं न ह्यैच्छन् । पूर्णरूपेणेमे रूढिवादिन आसन् ।

ततो स्थविरवादस्यापि द्वौ भेदावभूताम् । हेमवन्तः स्वास्तित्वावादिनश्च । ततो स्वास्तित्ववादिनोऽपि विभागद्वये विभक्ता अभूवन् । प्रकारेणानेन महासंधिकानामपि द्वौ भेदावभूताम् । इमे सर्वे विभागाः प्राचीनस्य बौद्धमतस्य वर्तन्ते ।

कालक्रमेण महासंधिकस्य नाम महायानं, स्थविरवादिनाञ्च नाम हीनयानमभूत् । पुनः कालक्रमेण महायानस्य द्वे शाखेऽभूताम् -योगाचारो माध्यमिकश्च । एवमेव हीनयानस्यापि द्वे शाखेऽभूतां- वैभाषिकः सौत्रान्तिकश्च । साम्प्रतिकेऽपि काल एतेषामेव भेदानां इमान्येव नामानि सन्तीति । एतेषां संक्षिप्ततमः परिचयोऽधस्तादुपस्थाप्यते ।

**माध्यमिकमतम्**

मतस्यैतस्य प्रमुखो विद्वान् नागार्जुनो बभूव । माध्यमिकाः "कारिका" नामकस्य ग्रन्थस्य प्रणयनं कृत्वा मतमिदं सुदृढं चकार । बौद्धाः प्रत्यक्षमनुमानञ्चेति द्वे एव प्रमाणे स्वीकुर्वन्ति । सो वक्ति-यदनुमानस्य प्रामाण्यविषये नास्ति सन्देहावसरः ।

अग्रे सो वक्ति- क्रियासम्पादकत्वमेव सर्वेषां वस्तूनां स्वभावः । कार्ये

संजाते तस्य वस्तुनः सत्ता समाप्तिमेति, अयमेवास्ते माध्यमिक सिद्धांतः। वस्तुतस्तु प्रतिक्षणं परिवर्तितं भवति एतेषां मतानुसारेण जगत् क्षणिकं दुःखमयं च विद्यते। क्षणिकत्वादेवास्य समानलक्षणस्याभावो विद्यते । अत एव किमपि वस्त्वपरवस्तुसदृशं नास्ति। फलतः सर्वाणि वस्तूनि स्वलक्षणानि सन्ति। सर्वेषामेव वस्तूनां शून्यत्वमुपदिशन् माध्यमिको नागार्जुनो वक्ति यत्।

**न सन्नासन्न सदसन्न चाप्युभयात्मकम् ।**
**चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकाः विदुः ॥**[१]

अयमर्थो यत् किमपि वस्तु न सदस्ति, न चासदस्ति, न वा सदसदस्ति न वोभय विलक्षणमस्ति। इत्थमुक्तेभ्यः चतसृभ्यो कोटिभ्यो विनिर्मुक्तमेकं शून्यमेव तत्त्वम् । शून्यमेव परमं तत्त्वं माध्यमिकानां मतानुसारेण वर्तते । तदिदं शून्यमलक्षणमस्ति। शून्यतैव प्रीतत्यसमुत्पाद इति प्रतिपादयन् नागार्जुनो वक्ति

**''यः प्रतीत्य समुत्पादः शून्यतां तां प्रचक्ष्महे।**[२]

**योगाचारमतम्**

योगाचारमतस्यापरं नाम विज्ञानवादो वर्तते । अयमपि बाह्यवस्तूनि माध्यमिकमिव क्षणिकं, दुःखरूपं स्वलक्षणं शून्यञ्च स्वीकरोति । किन्तु सः बौद्धानामर्थान्तरं सत्तां स्वीकरोति। योगाचारेणाभिहितं यत् ज्ञानरूपाणां वस्तूनां बुद्धत्वस्यास्वीकरणे जगदिदमखिलं तमश्च्छन्नं स्यात्। अत एव योगाचारेणाभिहितं यत् ज्ञानान्नास्ति किञ्चिद् व्यतिरिक्तम्। सो वक्ति यत् प्रकाश्यं, प्रकाशकं, ज्ञाता, ज्ञेयं, ज्ञानमित्यादिकाः सर्वे भेदाः भ्रमरूपाः सन्ति। माध्यमिकाः शून्यत्त्वावाप्तिमेव मोक्षमभिधत्ते। किन्तु योगाचारः शुद्धस्य विज्ञानस्योदयमेव मोक्षं मन्यते।

**सौत्रान्तिकमतम्**

मतस्यास्य स्थापनां चकारमुमालातः । अयं ज्ञानेनैव साकं ज्ञेयानामपि पदार्थानां सत्ता स्वीकरोति । सो वक्ति- यज्ज्ञानं ह्यन्तर्वस्तु विद्यते । तस्य शुद्धकारः ''अहमहमित्याकारं ज्ञानं विद्यते। तस्य प्रतीतिरिदन्त्वेन प्रतीयमानैः बाह्यैः वस्तुभिर्नहि भवितुमर्हति। भेदादेव सुषुप्तावहमेव प्रतीतिर्भवति न त्विदम्ः। येन प्रकारेण पुष्ट्या भोजनस्य, भाषया देशस्य, गद्गद्वाण्या च स्नेहानुभूतिर्भवति तेनैव प्रकारेण ज्ञानस्य प्रकारभेदेन द्वारा ज्ञेयानां वस्तूनां सत्तयाऽनुमानं कर्तुं शक्यते । अस्य मतस्यानुसारेण समविस्तारयुक्तं क्षणिकज्ञानसन्तानमेवात्मा स्वीक्रियते। सः ज्ञानस्वरूपस्य वृक्षस्य पञ्चस्कन्धान् स्वीकरोति। (१) रूपस्कन्धः (२) विज्ञानस्कन्धः (३) वेदनास्कन्धः (४) संज्ञास्कन्धः (५) संस्कारस्कन्धश्च।

---

१- माध्यमिक कारिका १/६ २. माध्यमिक कारिका २४/१९

**वैभाषिकमतम्** वैभाषिको बौद्धः बाह्यानां पदार्थानामनुमेयत्वं न ह्यपि तु प्रत्यक्षविषयत्त्वमेव स्वीकरोति। तन्मतानुसारेणेन्द्रियजन्यं प्रत्यभिज्ञानमेव प्रत्यक्षमित्यभिधीयते। अयमपि ज्ञानस्य क्षणिकत्वं जगतश्च क्षणभंगुरत्वं प्रतिपादयति।

## १.९ आस्तिक दर्शनानि ।

येन प्रकारेण चत्वारिचार्वाक्दर्शनानि, जैनदर्शनं, बौद्धदर्शनञ्चेति, षट्संख्याक ानि सन्ति नास्तिकदर्शनानि तेनैव प्रकारेणास्तिकदर्शनान्यपि षट्संख्याकानि सन्ति। (१)न्यायदर्शनम् (२) वैशेषिकदर्शनम् (३) सांख्यदर्शनम् (४)योगदर्शनम् (५) मीमांसादर्शनम् (६) वेदान्तदर्शनञ्च। अत एवाधस्तात् साम्प्रतमास्तिकदर्शनानां संक्षिप्ततमा चर्चा क्रियते।

## १.१० न्यायदर्शनम्

अस्य दर्शनस्याद्याचार्यो महर्षिर्गौतमो वर्तते। महर्षिरयं कणादमिव केवलं पदार्थानामेव विचारमकृत्वाऽऽत्मनः, इन्द्रियाणाम्, पुनर्जन्मनः दुःखम्, मोक्षादिकस्य च विस्तरेण विचारं करोति स्म ।

महर्षि कणादस्तु सप्तपदार्थवादी वर्तते, किन्तु महर्षिः गौतमः षोडशपदार्थवादी वर्तते। ते च पदार्थाः सन्ति (१) प्रमाणम् (२) प्रमेयम् (३) संशयः (४) प्रयोजनम् (५) दृष्टान्तः (६) सिद्धांतः (७) अवयवाः (८) तर्कः (९) निर्णयः (१०) वादः (११) जल्पः (१२) वितण्डा (१३) हेत्वाभासः (१४) छलम् (१५) जातिः (१६) निग्रहस्थानञ्च। एतेषां पदार्थानां सम्यग् ज्ञानेनैवापवर्गस्याप्तिर्भवतीति न्यायदर्शनस्य सिद्धांतः।

महर्षिः गौतमः स्वकीये न्यायदर्शने प्राक् प्रमाणानामेव विचारं प्रस्तौति, तदनन्तरं प्रमेयाणाम्। न्यायदर्शनाभिमतानि चत्वारि प्रमाणानि सन्ति। (१) प्रत्यक्षम् (२) अनुमानम् (३) उपमानम् (४) शब्देश्चेति। एतद्दर्शनाभिमतानि प्रमेयाणि द्वादशविद्यते। तद्यथा- (१) आत्मा (२) शरीरम् (३) इन्द्रियाणि (४) विषयाः (५) बुद्धिः (६) मनः (७) प्रवृत्तिः (८) दोषः (९) प्रेत्यभावः (१०) फलम् (११) दुःखम् (१२) अपवर्गश्च।

तथा च सूत्रम् "आत्माशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभाव फलदुःखापवर्गास्तु प्रमेयम्"[१]-इति।

न्यायदर्शनानुसारेणात्मा-ईच्छाद्वेषप्रयत्नसुखदुःखज्ञानैरनुमीयते न्यायस्य

१-न्यायदर्शनम् १/१/९

द्वौ पूर्वाङ्गौ: स्तः-संशयः प्रयोजनञ्च। अनेनैव प्रकारेणास्य द्वावुत्तराङ्गावपि स्तः-तर्कः निर्णयश्च। महर्षिणा गौतमेन निबद्धेऽस्मिन् न्यायदर्शने पञ्चाध्यायाः, दशाह्निकाः, चतुरशीति प्रकरणानि, अष्टाविंशत्युत्तरपञ्चशतानि सूत्राणि च सन्ति।

अर्वाचीनेषु शताब्देषु तथाविधानां ग्रन्थानां निर्माणमभूत् येषु न्यायवैशेषिकयोरुभयोरेव दर्शनयोः विषयाणां विवेचनं मिश्रीकृत्वाऽभूत्। अन्नंभट्टेन प्रणीतस्तर्कसंग्रहस्तथाविध एव ग्रन्थो विद्यते।

एतद्दृब्धानां ग्रन्थानां निर्माणस्यायं परिणामोऽभूत्, यत् सामान्यतो जनाः जानन्त्येव नहि यन्न्यायवैशेषिकयोर्दर्शनयोः को भेदो विद्यत इति।

एतस्मादेव कारणादत्र तयोदर्शनयोर्विद्यमानानां भेदानां संक्षिप्ततमं निरूपणमधस्तात् क्रियते।

(१) न्यायदर्शनानुसारेण षोडशपदार्थाः सन्ति, किन्तु वैशेषिकदर्शनानुसारेण सप्तैव पदार्थाः सन्ति।

(२) न्यायदर्शने प्रमाणानां विचारो प्रमुखतया कृतो वर्तते, । किन्तु वैशेषिकदर्शने प्रमेयाणामेव विचारः विशेषरूपेण कृतो वर्तते।

(३) न्यायदर्शनं चत्वारि प्रमाणानि स्वीकरोति, किन्तु वैशेषिकदर्शनन्तु द्वे एव प्रमाणे स्वीकरोति।

(४) न्यायदर्शनानुसारेण-चाक्षुषं, श्रावणं, स्पार्शजं, घ्राणजं, रासनञ्चेति पञ्चप्रत्यक्षाणि भवन्ति, किन्तु वैशेषिकदर्शनानुसारेण तु केवलं चाक्षुषमेव प्रत्यक्षं भवति।

(५) न्यायदर्शनानुसारेण समवायः प्रत्यक्षविषयो वर्तते, किन्तु वैशेषिकदर्शनानुसारेण तस्यानुमानं भवति।

अनेनैव प्रकारेण पीठरपाकपीलुपाकादि विषयकाः भेदारुभयोर्दर्शनयोः सन्तीति एतावतैव विरम्यते।

## १.११ वैशेषिकं दर्शनम्

दर्शनस्यास्य जनको महर्षिः कणादस्स्वीक्रियते। महर्षिरयं विशेषनामकस्यापि पदार्थस्य समर्थनं चकार। अत एवास्य दर्शनस्य नाम वैशेषिकं दर्शनमभूत्। किञ्चायं महर्षिर्येन प्रकारेण स्वकीये दर्शने पदार्थनां यादृशं क्रमविशेषं निरूपयामास, तादृशं क्रमविशेषं कुत्रापि नह्यन्यत्रोपलभ्यते। अत एवास्यदर्शनस्य वैशेषिकं नामाभूत्।

स्वीचकारायं महर्षिः प्रमाणद्वयं-प्रत्यक्षानुमानञ्च। सोऽनुपलब्धेः प्रत्यक्षे; तथाचान्यैः दार्शनिकैः स्वीकृतानां प्रमाणानामनुमानेऽन्तर्भावमकार्षित्। स्वीचकारायं महर्षिरुभयोर्जीवात्मपरमात्मनोस्सत्ताम्। एतन्मतानुसारेणोभौ नित्यौ स्तः। नित्य

ज्ञान -नित्यसंकल्प -नित्येच्छेत्यादिभिर्धर्मैः परमात्मा भिद्यते जीवात् । स एव सम्पूर्णसृष्टेः सञ्चालकोऽनेकजीवानाञ्च संरक्षको विद्यते । एतेषां मतानुसारेण परमात्मनो नित्येच्छया परमाणुषु क्षोभो भवति । परमाणूनां संयोगविशेषेणैव सृष्टिः प्रारभ्यते । दर्शनमिदं परमाणुकारणवादमेव स्वीकरोति । दर्शनेऽस्मिन् सप्तपदार्थाः स्वीक्रियन्ते । द्रव्यगुणकर्मसामान्यविशेषसमवायाभावश्च । द्रव्याण्यपि नव प्रकारकाणि भवन्ति पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनां भेदात् । गुणाश्च-रूपरसगन्धस्पर्शादिकाः चतुर्विंशतिसंख्याकाः सन्ति । कर्माणि तूत्क्षेपणापक्षेपणा-कुञ्चनप्रसरणगमनभेदात् पञ्चविधानि सन्ति । सामान्यमपि परापरभेदेन द्विप्रकारकं भवति । विशेषस्त्वेक एव । समवायोऽपि तथाविधिः । अभावश्च प्रागभाव-प्रध्वंसाभाव अन्योऽन्याभाव अत्यन्ताऽभावानां भेदाच्चतुर्विधः ।

महर्षिणा कणादेन प्रणीते सूत्रग्रन्थे दशाध्यायाः सन्ति । प्रत्येकेष्वध्यायेषु द्वौ द्वावाह्निकौ स्तः । महर्षिरयं स्वकीये वैशेषिके दर्शन उद्देश्य-लक्षण-परीक्षणानां क्रमेण विचारान् प्रस्तौषीत् ।

## १.१२ सांख्यदर्शनम्

अन्यानि दर्शनानि यथा तथा सांख्यदर्शनस्यापि सिद्धान्ता अतीव प्राचीनाः सन्ति । श्वेताश्वतरमैत्रायणीययोरुभयोपनिषदोः सांख्यदर्शनस्य विचाराः समुपलभ्यन्ते । अस्य दर्शनस्य प्रवर्तको महर्षिः कपिलो वर्तते । सः सांख्यसूत्राणां प्रणयनमकार्षीत् । श्रीमद्भागवतेऽपि महर्षेः कर्दमस्य पुत्रो महर्षिः कपिलः स्वमातरं सांख्यदर्शनस्योपदेशं करोति ।

संख्याबुद्धेर्नामास्ति । संख्यामधिकृत्य प्रवृत्तं शास्त्रं सांख्यशास्त्रमिति सांख्यशास्त्रस्य व्युत्पत्तिः । अमरकोषकारः संख्याशब्दं विचारणायाः पर्यायभूतं मन्यते । **चर्चासंख्या विचारणे**[१] ति सांख्यं विवृण्वन् शंकराचार्योऽपि लिखति - इमे सत्त्वरजस्तमांसिमयदृश्याः । अहन्तेभ्योऽन्यः । तद्व्यापारसाक्षीभूतो नित्यो गुणविलक्षण आत्मेति चिन्तनम् । एष सांख्यः, इति ।

**सांख्यदर्शनस्य प्रमेयाः प्रमाणानि च ।**

सामान्यतो जनानामियं धारणा वर्तते यत् पूर्वं सांख्यदर्शनमीश्वरवादी आसीत् । कालान्तरेण निरीश्वरवाद्यभवत् । परञ्च वास्तविकतेयं वर्तते यत् ईश्वरो मानवबुद्धेर्विषयो नास्तीति वदति सांख्यसूत्रकारः । यद्यपि सांख्यदर्शने कापि चर्चा कृता नहि वर्तते, किन्तु दर्शनेऽस्मिन्नीश्वरस्य खण्डनमपि नहि कृतमस्ति । पञ्चविशंति तत्त्वात्परः परब्रह्मेश्वर इति भगवान श्री स्वामिनारायणः ।

---

१- अमरकोषः १/५/२

सांख्यकारिकाकार ईश्वरकृष्णोऽपीश्वरस्य स्वीकारस्य कामाप्यावश्यकतां न ह्यनुभवति। सः पञ्चविंशति तत्त्वानामेव चर्चां करोति सांख्यकारिकायाम्। अत्र प्रकृतिः, महत् तत्त्वम् अहंकारः, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चमहाभूतानि, मनः पुरुषश्च मिलित्वा पञ्चविंशति तत्त्वानि भवन्ति।

ईश्वरकृष्णः सांख्यकारिकायाः द्वितीयायां कारिकायामभिधत्ते तद्विपरीतः श्रेयान् **'व्यक्ताव्यक्तज्ञ विज्ञानात्'** [१]इति।

सांख्यदर्शनानुसारेण प्रकृतिरेव जगतः कारणम्। प्रकृतिपुरुषयोः संयोगादेव सृष्टिः प्रवर्तते सांख्यदर्शनानुसारेण। प्रकृतिपुरुषयोर्विवेकेन च मोक्षो भवति।

सांख्यदर्शनं सत्कार्यवादं स्वीकरोति। कारणे कार्यं सदिति सत्कार्यवाद स्याभिप्रायः। दर्शनस्यास्योदयः दुःखजिहासया भवति। ईश्वरकृष्णो वदत्यपि, **"दुःखत्रयाभिधाताज्जिज्ञासा तदभिधातके हेतौ[२]"**। सांख्यदर्शनं त्रिणि प्रमाणानि स्वीकरोति प्रत्यक्षानुमानशब्दश्च। एतद्व्यतिरिक्तानां प्रमाणानां सांख्या एतेष्वेव त्रिषु प्रमाणेष्वन्तर्भावं मन्यन्ते।

सांख्याः स्वीकुर्वन्ति यदनादिकालतो जीवः प्रकृतिचक्रे पतितो वर्तते। यदा तस्मिन् प्रकृतिपुरुषयोर्विवेको भवति, तदा सोऽस्मात् संसारचक्रान्मुक्तो भवति।

प्रकृतिः स्वयं सत्त्वरजतमोगुणमयी विद्यते। सृष्टेः प्रागिमे त्रयेऽपि गुणाः तस्यां साम्यावस्थापन्नाः भवन्ति। प्राप्ते च सृष्टिकाले तस्यां क्षोभः प्रजायते। ततः प्रवर्तते सर्ग इति सांख्यानां सिद्धान्तः।

## १.१३ योगदर्शनम्

अस्य दर्शनस्य प्रवर्तको महर्षिः पतञ्जलिरस्ति। "पातञ्जलयोगदर्शनम्" अस्य दर्शनस्य प्राचीनतमः सूत्रग्रन्थोऽस्ति। ग्रन्थोऽयं चतुर्षु पादेषु विभक्तो वर्तते। (१) समाधिपादः (२) साधनापादः (३) विभूतिपादः (४) कैवल्यपादश्च।

प्रथमे पादे समाधेः स्वरूपं, तस्य लक्षणञ्चास्ति प्रतिपादितम्। योगं लक्षयन् महर्षिः पतञ्जलिर्वक्ति **"योगश्चित्तवृत्तेर्निरोधः"**[३] द्वितीयपादे लक्ष्यप्राप्तेः साधनानां वर्णनमस्ति। तृतीयपादे-चालौकिकानां सिद्धिनां वर्णनमस्ति। इमाः सिद्धयः योगद्वारैव लभ्यते। चतुर्थे हि पादे मोक्षस्य स्वरूपमस्ति वर्णितम्।

---

१-सांख्यकारिका २
२- सांखकारिका १
३- पातञ्जलयोगदर्शनम् १/२

याज्ञवल्क्यस्मृत्यनुसारेणास्य दर्शनस्याद्यप्रर्तकः हिरण्यगर्भ एवास्ते । योगदर्शने त्रिणि प्रमाणानि स्वीक्रियन्ते (१) प्रत्यक्षम् (२) अनुमानम् (३) आप्तञ्च । इमानि त्रिणि प्रमाणानि ज्ञानस्य साधनानि सन्ति ।

योगदर्शनानुसारेणात्मविषयकं यथार्थज्ञानं मनस विषयनिष्ठप्रयोगद्वारा न हि भवत्यपि त्वात्मनः क्रियाणां दमनेन द्वारा भवति । एतेन द्वारा मनुष्यस्य साधारणं जीवनं क्रियाकलापश्च दैवीयप्रकृतिका भवन्ति ।

योगस्याष्टावङ्गानि सन्ति (१) यमः (२) नियमः (३) आसनः (४) प्राणायामः (५) प्रत्याहारः (६) धारणाः (७) ध्यानः (८) समाधिः । आत्मानो लक्ष्यस्य प्राप्त्यादीन्द्रियाणां निग्रह आवश्यकं मनुतेऽयं दर्शनम् । योगदर्शने मोक्षस्य नाम कैवल्यं वर्तते । केवलस्य भाव एव कैवल्यमित्यभिधीयते । अस्यामवस्थायां जीवः प्रकृतेः सम्बन्धान्मुच्यते । तथा च वक्ति योगसूत्रकारः " पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरुपप्रतिष्ठा वा चित्तशक्तिरिति"। इत्थं योगदर्शनं कैवल्यावाप्तिमेव मोक्षं मनुते ।

## १.१४ मीमांसादर्शनम्

केचिज्जनाः कथयन्ति यत् पूर्वमीमांसादर्शनमस्त्येव नहि, यतोऽत्र वेदार्थविचारः धर्मविषयकस्य ज्ञानस्याप्तिरस्ति । किन्तु वास्तविकी स्थितिरेतादृशी नास्ति । मीमांसायाः विषयो लौकिकाभ्युदयस्य परं निःश्रेयसश्च साधनस्य धर्मविचारो विद्यते । वेदार्थस्य निर्णयो एवास्य प्रमेयो वर्तते । मीमांसेयमाध्यात्मिकस्य चिन्तनस्यापि शिक्षां ददाति । अत एव मीमांसायाः दर्शनत्वं स्वीकारे कस्यचनापि विप्रतिपत्तिर्न हि भवित्री । मीमांसायाः लक्ष्यं स्वर्गाप्तिफलकमस्ति ।

दर्शनस्यास्य मूलग्रन्थो जैमिनिन्यायमाला विद्यते । अत्र द्वादशाऽध्यायाः सन्ति । अध्यायानामेतेषां वर्ण्याः विषयाः निम्नांकिताः सन्तिः । (१) धर्मजिज्ञासा (२) कर्मभेदः (३) शेषत्वम् (४) प्रयोज्यप्रयोजकभावश्च (५) कर्मणां क्रमः (६) अधिकारः (७)सामान्यः (८) अतिदेशः (९) ऊहः (१०) बाधः(११) तन्त्रम् (१२) अवापश्च । मीमांसायाः विषयाणां वेदैस्तर्कैश्च साकं सम्बन्धो विद्यते । मीमांसासूत्राणां केवलं शाबरभाष्यमुपलभ्यते । दर्शनस्यास्य परवर्तिनः प्रमुखाः विद्वांसः सन्ति–कुमारीलभट्टः, मण्डनमिश्रः, प्रभाकरमिश्रः, शालिकानाथमिश्रः, पार्थसारथि मिश्रः, मुरारिमिश्रः, खण्डदेवादिकाश्च ।

अस्य दर्शनस्य विशिष्टे मते द्वे स्तः, कुमारिलभट्टस्य मतम्, प्रभाकर मिश्रस्य मतञ्च ।

## १.१४ प्रभाकरमतम्

प्रभाकरमिश्र प्रकरणपञ्जिकायां अष्टौ पदार्थान् स्वीकरोति (१)द्रव्यम् (२) गुणः (३) कर्म (४) सामान्यम् (५) समवायः (६)संख्या (७)शक्तिः (८) सादृश्यं च । इमे सर्वे पदार्थाः नैयायिकैः वैशेषिकैश्च स्वीकृ तैः पदार्थैः साकमत्यधिकं साम्यं बिभ्रति । एतन्मतानुसारेण निम्नांकितानि नवद्रव्याणि च सन्ति । (१) पृथिवी (२)आप् (३) तेजः (४) वायुः (५) आकाशः (६) कालः (७) आत्मा (८) मनः (९) दिक् च

प्रभाकरमिश्रः आत्मानं ज्ञानाश्रयं, मानसप्रत्यक्षस्याविषयं च मन्यते । अयं तमसोऽतिरिक्तद्रव्यत्वं न हि स्वीकरोति। एष एकविशंतिसंख्याकान् गुणान् स्वीकरोति।

## १.२.१४. कुमारिलभट्टमतम्

कु मारिलभट्टः द्विप्रकारकान् पदार्थान् स्वीकरोति -भावपदार्थः, अभावपदार्थश्च। द्रव्यगुणकर्मसामान्यानि भावपदार्थानि। अभावोऽपि चतुष्प्रकारको भवति - प्रागभावं, प्रध्वंसाभावं, अन्योऽन्याभावं,अत्यन्ताभावञ्चेति भेदात् ।

आभ्यां द्विप्रकारकाभ्यां भिन्नं मुरारिमिश्रस्यापि मतमुपलभ्यते । अयं ब्रह्मैव वास्तविकं पदार्थं मनुते। व्यवहारार्थं सः चतुर्दशपदार्थान् स्वीकरोति- धर्मि-धर्म-आधारः प्रदेशविशेषश्च। इयं मीमांसा ब्रह्ममीमांसेति शब्द्यते।

## १.३.१४. जीवेश्वरमोक्षविषयकाः विचाराः

शबरस्वामी ईश्वरं जगतः कर्ता न हि मनुते - सो वक्ति यदीश्वरस्य विषये तादृशं किमपि प्रमाणं नास्ति। कुमारिलभट्टस्तु सृष्टिप्रलयञ्चापि न हि स्वीकरोति - अत एवैतस्य मते ईश्वरस्वीकारस्य कस्यचनावसरं एव नास्ति। मीमांसकानां मतानुसारेणात्मा देहेन्द्रियेभ्यो भिन्नो कर्ता-भोक्ता विभुश्चास्ति। एतन्मतानुसारेण भोगायतनस्य शरीरस्य, भोगसाधनानामिन्द्रियाणां, भोगविषयाणां च नाश एव मुक्तिरस्ति मोक्षावस्थायां जीवस्य सम्बन्धानामानन्दस्य विलयो भवति, तस्मान्निः- -सम्बन्धो निरानंदश्च मोक्षः ।

## १.४.१४. प्रमाणविषयको विचारः

मीमांसायाः प्रमुखो विषयो धर्मोऽस्ति । यागादिक्रियासु प्रर्वतकैः विध्यादिकैर्वेदवाक्यैर्लक्षितोऽर्थ एव धर्मः । धर्मो वेदैरेव ज्ञातुं शक्यते । प्रमाऽप्रमयोर्भेदाद्, द्विप्रकारकं भवति ज्ञानम्। यथार्थाऽनुभव एव प्रमा। तस्याः प्रमाया उत्पत्ति प्रमाणेनैव भवति । प्रमाणं लक्षयता शास्त्रीदीपिकाकारेण

अ.१

पार्थसारथिनोक्तं –कारणदोषबाधकज्ञानरहितमगृहीत ग्राही ज्ञानं प्रमाणमिति ।

भाट्टमीमांसका: षट् प्रमाणानि स्वीकुर्वन्ति (१) प्रत्यक्षम् (२) अनुमानम् (३) उपमानम् (४) शब्द: (५) अर्थापत्ति: (६) अनुपलब्धिश्चेति । प्रभाकरोऽनुपलब्धिं प्रमाणरूपेण न हि स्वीकरोति, अत एव तस्य मतानुसारेण पञ्चैव प्रमाणानि सन्ति

## १.१५ वेदान्तदर्शनम् ।

''**मन्त्रब्राह्मणयोर्वेदनामधेयम्**'' इति कात्यायनश्रौतसूत्रानुसारेण वेदस्य द्वौ भागौ स्त: (१) मन्त्रभाग: (२) ब्राह्मणभागश्च । ब्राह्मणभागस्यैव भागविशेष उपनिषदित्यभिधीयते । उपनिषदां वाक्यान्येव यस्मिन् दर्शने प्रमाणरूपेण स्वीक्रियन्ते तद् दर्शनं वेदान्तदर्शनमित्यभिधीयते ।

वेदानामन्तो वेदान्त इति वेदान्तपदविग्रह: । अत्रान्तशब्दोऽन्तिमभागपरो विद्यते । वेदानां बह्व्य: शाखा: सन्ति, तासां शाखानामन्तिमो भाग एवोपनिषदित्यभिधीयते । आसूपनिषत्स्वेव वेदान्तशब्दस्य साक्षात् प्रयोगो भवति । उपनिषद्व्यतिरिक्ता: ये ब्रह्मसूत्रेतिहासपुराणादिका: ग्रन्था: सन्ति, यद्वा भाष्यादिका: सन्ति तेषु तेषामुपनिषदर्थप्रतिपादकत्वादेव वेदान्तशब्दस्य गौण: प्रयोगो भवति ।

## उपनिषदां संख्या

वेदानां शाखाविषये मर्हषिर्पतञ्जलिर्लिखति । ''**सहस्त्रवर्त्मा सामवेद:, एकशतमध्वर्युशाखा, एकविंशतिधाबह्वृच:, नवधा अथर्वण:** ।[१]'' वाक्येनानेनायमर्थस्तु स्पष्ट एव जातो यन् महर्षे: पतञ्जले: काल इमा: सर्वा: एकविंशदुतरैकादशसंख्याका: वेदानां शाखा आसन्नेव । किन्तु सम्प्रति काले अष्टौ नव वा वेदानां शाखा: समुपलभ्यन्ते । एतद्व्यतिरिक्ता: सर्वा शाखा: अस्माकमनवधानाद् दौर्भाग्याद् वा शिक्षाविदामौदासीन्याद् विलुप्ता: सन्ति । यत्र सर्वासां शाखानामन्तिमोऽध्याय उपनिषत्शब्देनाभिधीयते तत एवोपनिषदां संख्या वेदशाखावद् भूयसी भाव्या, किन्तु साम्प्रतमुपलभ्यमानानां संख्यातीवाल्पीयसी वर्तते । तासु सर्वासूपनिषत्सु दशसंख्याका उपनिषदस्त्वतीव प्रख्याता: सन्ति । ता: सन्ति (१)ईशोपनिषत्(२)केनोपनिषत्(३)प्रश्नोपनिषत्

---

१– पस्पशाह्निक–पृ. ५२

(४)मुण्डकोपनिषत् (५) माण्डूक्योपनिषत् (६) ऐतरेयोपनिषत् (७)तैत्तिरीयोपनिषत् (८) छान्दोग्योपनिषत्(९)बृहदारण्यकोपनिषत् (१०) कठोपनिषच्च ।

किन्तु प्रस्थानत्रय्याः ये भाष्यकाराः सन्ति ते तु षट्त्रिंशत् संख्याकानामुदाहरणं स्वकीयेषु भाष्येषूद्धृतवन्तः । मन्ये पञ्चशतवर्षाणां प्रागेक उपनिषदां संग्रहः प्रकाशितोऽभूद् वाराणसीतः, तस्मिन् संग्रहे एकविंशदुत्तरशतसंख्याका उपनिषदः संगृहीताः सन्ति । एक उपनिषदां संग्रहो मोतीलाल बनारसीदास नामकात् देहल्या संस्थानादपि प्रकाशितो वर्ततेऽर्वाचीनः । तस्मिन् संग्रहे षडशीत्युत्तरशतसंख्याकाः सन्त्युपनिषदः परन्तु संग्रहस्यैतस्य बह्वीनामुपनिषदां प्रामाणिकत्वं सन्देहास्पदमेव वर्तते । आस्तां तावत् उपनिषदपि बहवः प्रनष्टा एव संजाताऽस्माकम-नवधानादेवेति तु निःप्रश्नयम् ।

उपनिषदां वेदान्तत्वं हि वेदशाखानामन्तिमे भागे विद्यमानत्वात् वेदान्तमर्थनिर्णायकत्वाद् वा भवति ।

## वेदान्तानां विषयाः

वेदान्तानां विवेच्याः विषयाः सन्ति-ब्रह्म जीव-मायेति प्रस्थानत्रय्याः भाष्याणामवलोकनाद्वक्तुं शक्यते । जीवेश्वरमायानामेव समूहितं नाम-तत्त्वत्रयं विद्यते । तत्त्वत्रस्यास्य निर्देशः तेषु तेषूपनिषत्सु ब्रह्मसूत्रेषु गीतायाञ्च प्राप्यते ।

तथा च श्रुतयः-

१. "**भोक्ता भोग्यं प्रेरितारञ्च मत्त्वा**[१]" २. "**ज्ञाज्ञौ द्वावजावीशानीशौ**[२]" ३. **क्षरं प्रधानममृताक्षरं हरःक्षरात्मनावीशते देव एकः**[३] ४. **प्रधानक्षेत्रज्ञ-पतिर्गुणेशः**[४], ५. **अन्तर्बहिश्चः तत्सर्वं व्याप्य नारायण स्थितः**[५] इत्यादिकाः सन्ति । आसु सर्वासु श्रुतिषु तत्त्वत्रयस्य वर्णनमुपलभ्यते गीतायामपि प्रोक्तम्

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥**
**उत्तमः पुरुषस्तवन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥**
**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥**[६]

निम्नांकितानि ब्रह्मसूत्राण्यपि चिदचिदीश्वरान् वर्णयन्ति । **'नेतरोऽनुपपत्तेः'**[७] **'भेदव्यपदेशाच्च 'अनुपपत्तेस्तु न शारीरः**[९]'

१- श्वेताश्वतरोपनिषद् १/१२
२- श्वेताश्वतरोपनिषद् १/९
३- श्वेताश्वरतरोपनिषद् १/९
४- श्वेताश्वरतरोपनिषद् ६/१६
५- महानारायणोपनिषद् ९/५
६- भगवद्गीता १५/१६ तः १८
७- ब्रह्मसूम् १/१/१७
८- ब्रह्मसूत्रम् १/१/१८
९- ब्रह्मसूत्रम् १/२/३

**'कर्मकर्तुव्यपदेशाच्च'[1] "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्"[2] 'मुक्तोपसृप्य व्यपदेशाच्च'[3] "सुषुप्त्युत्क्रान्तेर्भेदेन"[4] "अधिकं तु भेदनिर्देशात्"[5]।**

एतेषु त्रिषु तत्त्वेषु चित्-चेतना-जीवः, प्रत्यक्, प्रत्यगात्मा आत्माभोक्तादिशब्दैस्तत्र तत्र सर्वत्रवेदान्तग्रन्थेषु जीवस्य भवत्यभिधानम्। अचित्-अचेतनः, पराक् प्रकृतिः-माया-प्रधानम् अक्षरम्, अशब्दमित्यादि भिश्शब्दैर्मायायारभिधानं भवति। भवति चाभिधानं परमात्मा, ईश्वरः, ब्रह्म,परब्रह्म,इत्यादिशब्दैः परमात्मनः ।

यद्यपि मुख्यरूपेणोपनिषदामेव वेदान्तशब्देनाभिधानं भवति स्म। तथापि कालान्तरेण महर्षिणा बादरायणेन प्रणीतेषु ब्रह्मसूत्रेष्वेव वेदान्तसंज्ञा मुख्यतामगमत्। एतस्य कारणमिदमस्ति यद् ब्रह्मसूत्रेषु विवादास्पदानां सर्वेषामुपनिषद्वाक्यार्थानां निर्णयो कृतो वर्तते । तदनन्तरं ते ते भाष्यकाराः मुख्यतया वेदान्तसूत्राणामेव व्याख्यामकार्षुः । भाष्यकारैः स्वस्वविचारानुसारेणैव भाष्याणां विरचितत्त्वाद् वेदान्तदर्शनस्य नैके सिद्धांता अभूवन् । तद्यथा-अद्वैतसिद्धान्तः, द्वैतसिद्धान्तः, शुद्धाद्वैतसिद्धान्तः, द्वैताद्वैतसिद्धान्त इत्यादिकाः। एतस्य फलरूपेणानेके सम्प्रदाया अपि प्रवृत्ता अभूवन् ।

## अद्वैतसम्प्रदायः

तेषु सर्वेषु सम्प्रदायेषु पप्रथममायाति नाम अद्वैतसम्प्रदायस्यैव। अस्याद्वैत सम्प्रदायस्य प्रमुख आचार्यः श्रीस्वामी आद्यशङ्कराचार्यो विद्यते। श्रीशङ्कराचार्यः अध्यासवादमाश्रित्य ब्रह्मसूत्राणामुपनिषदां गीतायाश्च भाष्यमरीरचत् । एतन्मतानुसारेण ब्रह्मैव सत्यं तत्त्वं वर्तते । तस्मिन्नेवाध्यस्तं वर्तते जगत् । येन प्रकारेण रज्ज्वावध्यस्तो सर्पो मिथ्या भवति, तेनैव प्रकारेण ब्रह्मण्यध्यस्तं जगन्मिथ्या वर्तते। ब्रह्मणि जगदध्यासः दोषवशाद् भवति। स च दोषोऽविद्यारुप एव । अज्ञानस्य व्यष्टिरेवाविद्येत्यभिधीयते, समष्टिश्च मायेति । ब्रह्म अशेषविशेषप्रत्यनीकं वर्तते । तदैव चैतन्यं यदाऽविद्योपहितं भवति तदा जीवेत्यभिधीयते । यदा च माययोपहितं भवति तदेश्वरेत्यभिधीयते । अत एवाविद्योपहितं चैतन्यं जीवः। माययोपहितं चैतन्यमीश्वर इति कथ्यते ।

अद्वैतदर्शनानुसारेण जीवब्रह्मणोर्नास्ति भेदः । ब्रह्मैव जीवभावमाश्रित्य दोषवशाज्जगद् दर्शनं करोति। एतद् दर्शनानुसारेणाज्ञानस्य शक्तिद्वयं भवति - (१) आवरणशक्तिः (२) विक्षेपशक्तिश्च। आवरणशक्त्याऽज्ञानं वस्तुनः स्वरूपं तिरोधत्ते। विक्षेपशक्त्या च सा जगद्विस्तारयति। जगदिदं हि ब्रह्मणो विवर्तमेव

---

१- ब्रह्मसूत्रम् १/२/४
२- ब्रह्मसूत्रम् १/२/८
३- ब्रह्मसूत्रम् १/३/२
४- ब्रह्मसूत्रम् १/३/४३
५- ब्रह्मसूत्रम् २/१/२२

वर्तते। विवर्तश्चाऽतात्त्विको भवति। तथा ह्युक्तमपि

''**अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः**'' इति।

दर्शनस्यास्यानुसारेण वेदान्तस्याधिकारि साधनचतुष्ट्यसम्पन्न एव पुरुषो भवति। (१) नित्याऽनित्यवस्तु विवेकः (२) इहामुत्र फलभोगविरागः (३) शमदमादिसाधनषट्सम्पत्तिः (४) मुमुक्षुत्वञ्चेति साधनचतुष्ट्य मित्यभिधीयते। एतन्मतानुसारेणाऽविद्या निवृत्तिरेव मोक्षः। तन्निवृत्तिश्च तत्त्वमसीत्यादि-वाक्यजन्येन, प्रत्यक्षात्मकेन ज्ञानेन जायते। इदं प्रत्यक्षात्मकं ज्ञानं शुद्धेऽन्तःकरण एव जायते। अन्तःकरणशुद्धिरपि जन्मान्तरशतानुष्ठितेन, निष्कामकर्मानुष्ठानेन भवति।

अद्वैतदर्शनस्य प्रमुखः सिद्धान्त एकजीववाद एव विद्यते। श्रीशङ्कर-मतानुसारेणैकमेव शरीरं जीववत्। निर्जीवानीतराणि शरीराणि तच्छरीरं किमिति न व्यवस्थितम्।

श्रीवाचस्पतिमिश्रोऽनेकजीववादं स्वीकरोति। अद्वैतिनो विद्वांसः स्वप्रमेयाणां सिद्ध्यै षट्प्रमाणानि स्वीकुर्वन्ति। (१) प्रत्यक्षम् (२) अनुमानम् (३) उपमानम् (४) शब्दम् (५) अर्थापत्तिम् (६) अनुपलब्धिञ्च। एभिरेव षड्भिर्प्रमाणैः सर्वेषां प्रमेयाणां सिद्धिर्भवति।

## विशिष्टाद्वैतदर्शनम्

अद्वैतसिद्धान्तानन्तरं प्रमुखो हि सिद्धान्त आयाति विशिष्टाद्वैतसिद्धान्तः। अस्य सिद्धान्तस्य प्रमुख आचार्यो श्री रामानुजाचार्यो वर्तते। एतन्मतानुसारेण वेदान्तः सगुणस्यैव ब्रह्मणः प्रतिपादनं कुर्वन्ति। निर्गुणवाक्यानि तु परस्मिन् ब्रह्मणि हेयगुणानां निषेधं कुर्वन्ति। हेयगुणाश्च सन्ति प्राकृतिकाः। अत एवैतन्मतानुसारेण ब्रह्म-अखिलहेयप्रत्यनीकाखिलकल्याणगुणाकरं जगतोऽभिन्ननिमित्तो-पादानकारणं, सर्वज्ञं, सर्वशक्तियुतञ्च वर्तते।

तदिदं ब्रह्म चेतनाचेतनविशिष्टमद्वैततत्त्वं विद्यते। भगवान् नारायण एव परंब्रह्मपदेनाभिधीयते। स एवोपायो भवति, भक्तिप्रपत्तिभ्यां प्रसन्नश्चोपेयः। परब्रह्मणो विभूतिद्वयं विद्यते-लीलाविभूतिः, नित्यविभूतिश्च। जगदेव लीलाविभूतिर्कथ्यते, परमात्मनोधार्म च नित्यविभूतिरिति।

विशिष्टाद्वैतसिद्धान्तानुसारेण जीवः देहेन्द्रियमनः प्राणज्ञानेभ्यो व्यतिरिक्तोऽजडः, आनंदस्वरूपः, नित्यः, अणुपरिमाणकोऽव्यक्तः, अचिन्त्यः, निरवयवः, भोक्ता, कर्ता, ईश्वरस्य नियाम्यो, धार्यः, शेषश्च विद्यते।

जीवानामेतेषां भेदत्रयं भवति। बद्धमुक्तनित्येति भेदात्। इमे सर्वे जीवाः

ज्ञानस्वरूपाः ज्ञानाश्रयाश्च सन्ति । बद्धावस्थायां जीवो संसारि भवति । अस्यामवस्थायां मायया मोहितः सन् संसरति । भक्तिप्रपत्तिभ्यां कर्माणि सर्वाणि विनाश्य संसाराद् विमुक्तः सन्नाविर्भूतगुणाष्टको भवति । आत्मनो गुणाष्टकत्वं च- **एष आत्माऽपहतपाप्माविजरोविमृत्यु-विशोकोऽविजिघत्सोऽपिपासः सत्यकाम सत्यसङ्कल्पश्चे** [१] ति श्रुतिः प्रतिपादयति ।

एतन्मतानुसारेणाऽर्चिरादिमार्गेण भगवतो धाम; प्राप्यः भगवतः कृपयैव तदन्तरङ्गकैंकर्यस्य प्राप्तिरेव मोक्ष इत्यभिधीयते ।

माया तु जगन्मोहिनी वर्तते । सैव प्रकृतिः, अविद्याः, प्रधानमित्यादिभिः शब्दैरभिधीयते । इयं माया जीवान् मोहयति । इमामेवाश्रित्य परमात्मा जगतः सृष्टिं करोति ।

सम्पूर्णं चेतनाऽचेतनात्मकं जगत् परब्रह्मणः शरीरं वर्तते । परमात्मा च सम्पूर्णस्य जगत आत्मा । "**जगत्सर्व शरीरं ते** [२]" "**तत्सर्वं वै हरेस्तनुः** [३]" इत्यादिकानि वाक्यानि जगतः परमात्मशरीरत्वं प्रतिपादयति ।

## १.१६ श्री स्वामिनारायणदर्शनम्

दर्शनविकासक्रमप्राप्तान्तिमं दर्शनं चरमोत्कर्षं भजते दर्शनजगति । रामानुजाचार्यात्तदीक्षेन रामानंदेनेहोद्धवावतारेण प्रस्थापित '**औद्धवः सम्प्रदायः**' सम्प्रति '**श्रीस्वामिनारायणसम्प्रदाय**' इति ख्यातिमवाप । यथाद्वैतः शङ्करनाम्ना, विशिष्टाद्वैतः श्रीरामानुजनाम्ना प्रथितं तद्वत् दर्शनमिदं "श्रीस्वामिनारायणदर्शनम्" इति लोकविश्रुतिं गच्छन्नस्ति सम्प्रति । आपाततोऽधिगतसम्प्रदायग्रन्थः विशिष्टाद्वैतापरनामधेयमिदं दर्शनं गुर्जरप्रान्तप्रथितमिति वेत्ति । तत्त्वज्ञानविवित्सूणां कृतेऽत्र रामानुजीयग्रन्थानां पूर्वं प्रतिपादनात् । आचारसंहितायां चाध्यात्मिक-शास्त्रेत्त्वेन श्रीभाष्यगीताभाष्ययोरुल्लेखोऽपि तदुपजीव्यत्वेन प्रमाणं भवति [४]।

"**साम्प्रदायिकग्रन्थेभ्यो ज्ञेयो येषां तु विस्तरः** [५]"

इति शिक्षावचनमनुसरता दर्शनवैशिष्ट्यमपि प्रत्यक्षीक्रियते । तथापि सम्प्रदाये रामानुजीयानां पण्डितानां विशेषप्रभावो दृश्यते । दृश्यते सम्प्रदाय-रहस्यग्रन्थानां शोधनमपि तैस्कृतम् । अधुना दर्शनमिदं रामानुजीयमेव तद्भिन्नमिति च द्विधारा प्रचलिता । वस्तुतस्तु तत्त्वनिर्णयदृष्ट्या भिन्नमेवेदं दर्शनम् । रामानुजप्रतिपादितसिद्धान्तोपजीव्यत्वेनाप्यत्र तात्त्विकोऽपि भेदो प्रतिपादित एव । तत्त्वपञ्चकप्रतिपादनेन महद्पार्थक्यं स्वीकरोम्यहम् । श्रीकृष्णवल्लभाचार्येण

---

१- छांदोग्योपनिषद् ८/१/५
- मैत्रायणोपनिषद् ७/७
२-जनमंङ्गलस्तोत्रभाष्य उद्धृतम्
३-जनमंङ्गलस्तोत्रभाष्य उद्धृतम्
४-शारीरकाणा भगवद्, गीतायाश्चाव गम्यताम् रामानुजाचार्यकृतं भाष्यमाध्यात्मिकं मम ॥ शिक्षापत्री- १०० इति श्लोकेन
५-शिक्षापत्री श्लोक -२०३

महाविदुषा प्रत्यक्षीकृताः षडशीतिः (८६) भेदोभयोर्सम्प्रदायमध्ये श्रुतितात्पर्यनिर्णयर[1]। पञ्चदशोक्तिरुभयोर्समानेति तत्रैव तथापि भेदवैशिष्ट्याद्भेद एव।

तत्त्वमीमांसोद्यतानां प्रायः तत्त्वत्रयस्वीकरणं दृष्टीपथमायाति । औपाधिकभेदाभेदवादिभास्कराचार्यः, स्वाभाविकभेदाभेदवादिनिम्बार्क : अचिन्त्यभेदाभेदवादिचैतन्यमहाप्रभुप्रभृतय आचार्यचरणास्तत्त्वत्रयमुररीचक्रुः, जीवेशमायेति । न चिन्तयामासु आचार्यास्तत्त्वत्रयादाधिक्यं, किन्तु जीवेशमायाब्रह्मपरब्रह्मेति तत्त्वपञ्चकमुद्घोष्य स्थापितवान् भगवान् श्रीस्वामिनारायणः दर्शनजगत्यश्रुतपूर्वमिवाभाति, तथापि श्रुति मूलकत्त्वान्नानादरणीयम् । तत्त्वपञ्चकमीमांसा प्रस्तुता महाविदुषा श्रीकृष्ण वल्लभाचार्येण -

१. जीवात्मा नित्यः, आजीवनस्मृतिमत्वात्, पूर्वजन्मसंस्कारोत्त्थाद्यक्रियानुकूलस्मरणवत्त्वात् ।

२. ....अत एव प्रवाहगतब्रह्माण्डानां प्रवाहस्यानादित्त्वेन तद्रक्षकसंहारकेश्वराणामप्यनादित्वम् ।

३. ततो ब्रह्माण्डादिकारणात्मकमायाया अप्यनादित्त्वम्

४. तस्याः सृष्टिप्रयोजक ब्रह्मणोऽप्यनादित्त्वम् ।

५. तच्छरीरिणः परमात्मनोऽपि सृष्टिप्रवाहादिनिरीक्षकतयाऽनादित्वं सिद्धयति् ।[2] अन्यच्च-

जीवेश्वरमायाब्रह्मपरब्रह्मेतिपञ्चभेदा अनादयः, जीवात्मतत्त्वं ज्ञानघनात्मकं ज्ञानवच्च, ईश्वरात्मतत्त्वमैश्वर्यघनात्मकं चमत्कारसंभृतं च, मायातत्त्वज्ञानात्मकभावघनात्मकं छायाजाड्यसंभृतं च, ब्रह्मतत्त्वं प्रकाशघनात्मकं संचाञ्चल्य चैतन्यप्रेरकं च, परब्रह्मतत्त्वं आनन्दघनात्मकं स्वेतरसमस्तनियामकं चेति ।

स्वरूपस्वभावगुणतश्च भेदानां सिद्धत्त्वाद्दर्शनमिदं नवीनमपि पुरातनमेव। **"द्वा सुपर्णा सयुजा सखाया, ऋतं पिबन्तौ सुकृतस्य लोके गृहां प्रविष्टौ परमे परार्धे** [3]" **"नित्यो नित्यानाम्** [4]" इति श्रुतिततिः जीवपरमात्मनोर्भेदं व्यनक्ति। **"तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्** [5]" इत्यादिश्रुतिभिर्व्यक्त ईश्वरपरमात्मनोभेर्दः ।" **मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्** [6]" " **भोक्ता भोग्यं प्रेरितारं च** [7]" इत्यादिभिः मायापरमात्मनोर्भेदः

---

१- प्रकाशकः लेखकश्च श्रीकृष्णवल्लभाचार्यः सं. २०२८

२- ग.प्र. ७-ब्रह्मरसायनभाष्यः पृ. ९४

३- श्वेताश्वतरोपनिषत् ४/६
भावसंतरणोपाषित् २/२
मुण्डकोपनिषत् ३/१/१

४- कठोपनिषत् ५/१३

५-श्वेताश्वतरोपनिषत् ६/७

६-श्वेताश्वतरोपनिषत् ४/१०

७-श्वेताश्वतरोपनिषत् १/१२

ज्ञायते। '' **दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यान्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः**[१]'' ''**ब्रह्मविदाप्नोति परम्**[२]'' ''**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः**[३]'' इत्यादिना ब्रह्मपरब्रह्मविषयको भेदो भवति ज्ञातः।

यथाक्रमं तत्त्वपञ्चकव्याख्यानमग्रे भविष्यति। अत्र दर्शनविकासदक्षानां दार्शनिकानां जीवनवृत्तमेवाख्यायते मया दर्शनोद्गातुर्जीवनवर्णनपुरःसरम्। तेषां दार्शनिकराद्धान्तानां तत्र तत्र प्राप्तप्रसंगे प्रकरणमनुविवेच्यमाणत्वान्नपृथक्त्वेन निर्देशः।

---

१- मुण्डकोपनिषत् २/१/२
२- तैत्तरियोपनिषत् २/१/१
३- भगवद्गीता १५/१८

# दर्शन परिचयः

| दर्शन संज्ञा | प्रकारः | प्रवर्तकः | ग्रन्थाः |
|---|---|---|---|
| चार्वाक् | नास्तिकः | बृहस्पतिः | बृहस्पतिसूत्राणि |
| जैनः | नास्तिकः | ऋषभदेवः | तत्त्वार्थ धिगमसूत्राणि |
| बौद्धः | नास्तिकः | बुद्धः | |
| वैशेषिकः | आस्तिकः | कणादः | वैशिषिकसूत्राणि |
| न्यायः | आस्तिकः | गौतमः | कारिकावली–किरणावली |
| सांख्यः | आस्तिकः | कपिलः | सांख्यकारिका, सांख्यतत्त्वकौमुदि |
| योगः | आस्तिकः | पतञ्जलिः | योगसूत्र |
| मीमांसा | आस्तिकः | जैमिनि | जैमिनी न्यायमाला |
| वेदान्तः | आस्तिकः | उपनिषत्कामः | उपनिषत्–ब्रह्मसूत्र–गीता |
| अद्वैतः | आस्तिकः | शंङ्कराचार्यः | ब्रह्मसूत्रभाष्यं –गीताभाष्यम् |
| विशिष्टाद्वैतः | आस्तिकः | श्रीरामानुजाचार्यः | श्रीभाष्यम् |
| श्रीस्वा. दर्शन | आस्तिकः | भगवान श्री स्वामिनारायणः | वचनामृतम्–शिक्षापत्री– हरिवाक्यसुधासिन्धुः |

## १.१७ भगवतः स्वामिनारायणस्य "दर्शनोद्गातुःजीवनवृत्तम्"



**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
**अभ्युत्त्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥**[१]

**दत्तात्रेयः कृते युगे त्रेतायां रघुनंदनः ।**
**द्वापरे वासुदेवः स्यात् कलौ स्वामी वृषात्मज : ॥**[२]

**पाखण्ड बाहुले लोके स्वामिनाम्ना हरिः स्वयम् ।**
**पापपङ्कनिमग्नं तज्जगदुद्धरिष्यति ॥**[३]

**अवतारा ह्यसंख्येया हरेर्सत्त्वनिधेर्द्विज ॥**[४]

वचनान्येतानि भगवतोऽवतारेण साकं कलौ वृषात्मजस्य श्रीस्वामिनारायणस्याप्यार्विभावबोधकानि सन्ति । अष्टादशशताब्दस्योत्तरार्धे पूर्वमयोध्यापार्श्वस्थ "छुप्पैयाः" नाम्नि ग्रामे धर्मदेवाद् भक्तावाविर्भावः भगवतः श्रीस्वामिनारायणस्य समभवत् । तस्य वि.सं. १८३७-चैत्रशुक्ल नवम्यां तिथौ रात्रौ दशोत्तर-दशघटिका समये समलङ्कृतशैशववेषस्यानुकूलनयनानाह्लादकेन दिव्यकान्ति-पूरेण सूतिका गृहं व्यराजत । मार्कण्डेयमुनिना नामकरणं कृतम् । तस्य संजातस्य शिशोः

निजाश्रितापद्हरणात्- कर्कराशिजनेरपि ।
हरिरित्यभिधां तस्य, स चकारादितो मुनिः ॥
स्वस्मिन् भक्तहृदाकर्षाद् चैत्रमासजनेस्तथा ।
कृष्णवर्णाच्च विदधे कृष्ण इत्यभिधां ततः ॥

---

१- भगवद्गीता ४/७
२- द्विशताब्दिस्मृति ग्रन्थ उद्धृतम्
३- द्विशताब्दिस्मृति ग्रन्थ उद्धृतम्
४- श्रीमद् भागवतम् १/३/२६


શ્રીહરિની જન્મપત્રી ચિત્રાવલી નં.-૪
अथेयंश्रीजन्मकुंडलिकाशुभा
શ્રી જન્મકુંડલી


શ્રીહરિની જન્મપત્રી ચિત્રાવલી નં.-૫
अथेदंश्रीराशिकुंडलिकाचक्रम्

चंद्रोपम: सदाह्लादे देत्यत्रासे यमोपम: ॥
भवितेत्यभिधां चक्रे हरिकृष्ण इति द्विज ॥
हरि:, कृष्ण:, हरिकृष्ण इत्यादि । प्रतिदिनमुपचीयमानैर्दिव्यावयव: पितृन्, आनंदयन् स्वामितेन तेजसा कृत्याकालिदत्तादीन् व्यावर्तयन् सर्वान् विस्मापयामास। सो बाल: कालेनाप्तकौमारे पित्रोपवीतेन संस्कृत: बभूव । पितुर्सकाशाद् चाधिगतवेदवेदाङ्गो बभूव - स्वावतारकार्यचिकीर्षयापि मातापित्रोर्क्षेमाय सादरं तयोर्शुश्रूषां कुर्वन् गृह एव निवासमकरोत् ।

कालेनाल्पेनैव ज्वरपीडितां मातरं सकलग्रंथीविभेदकं स्वस्वरूपात्मकज्ञानं उपदेशयामास। ततस्तस्मिन् बालके स्वात्मजरूपां बुद्धिं विहाय परब्रह्मधिया सततमनुस्मरन्ती भक्तिदेवी पांचभौतिकं तनुं जहौ । अथ षण्णमासाऽनन्तरं क्षीणप्रारब्ध: प्राप्तभगवत्साक्षात्कार: परं भगवद्धाम प्राप पिता धर्मदेव: ।

अथ संवृते पितुरुत्तरकर्मणि स्वावतारकार्यं संस्मरन् स्नानव्याजेनोषषि नैजं गृहं तत्याज भगवान्। वनाद्वनं गच्छत: एकादशवर्षीये वयसि त्यक्तगृहस्य श्रीहरे: स्वरूपमलौकिकं शोभां दधौ। ससिंहशार्दूलवराहवारणमहामृगव्यालगणैश्च संकुले कण्टकभूयिष्ठे पथि अनुपानद्पदा नक्तन्दिवं सञ्चरन्त श्री नीलकंठ: फलकन्दमूलतोयमात्रेण देहनिर्वाहं करोति स्म । स: नातिचिरेणाप हिमाद्रेरुपत्यकाम्।

विचित्रधातुखनिभिर्युक्तस्य हिमाद्रे: मनोज्ञां वनश्रियं पश्यन् पथ: प्रच्युतो बभूव हरि:। महारण्ये प्रविष्टस्य पदव्या अलाभेन प्रतिरुद्धगते: हरे: साक्षाद्धिमालय: एव मूर्त्या आविर्भूय पथं प्रदर्शयामास। सजलां गिरिकन्दरां प्रविश्यापरस्मिन् दिने मार्गं प्राप्तवान् तत: । गण्डकीतीरसंस्थितं मुक्तनाथमन्दिरं प्राप्तवान्, त्रिषवणस्नानसन्ध्यामाचरन्नूर्ध्वदोरेकपादस्थ: गायत्रीं जपन् पपी साक्षात्कृत्वा समापयामास तप:। मुक्तनाथान्निर्गतस्य श्रीहरेस्तीव्रवैराग्यभाप्रभा प्रत्यक्षीभवति स्म। पर्वतीयेन महादत्ताभिधानेन राज्ञा संस्तुतो भूयोभूयोऽपि नोररीचकार राज्यश्री:। कृतपरिचरण: बृट्टोलपत्तनाधिपतिना संतुष्ट:, तस्मै दत्तदिव्यज्ञान: श्रीहरि गोपालयोगिनं प्राप्तवान्।

श्रीमद्गोपालयोगिना सकृदेवावबोधित: श्रीहरि: समाधिपर्यन्तमहायोगं विवेद । समस्ता योगकलामेकेनैव वर्षेण परिज्ञातस्य श्री नीलकण्ठस्य स्वरूपेऽतिमानुषीं मनीषामदधत् योगी। गोपालयोगी प्रत्यक्षोऽयं वेदवेदान्तवेद्य इति संवेदानुविहितभक्तिभाव: योगसिद्धमपि भौतिकं देह संत्यज्याक्षरं प्राप ।

तीर्थयात्राव्याजेन प्रतीचीं दिशमभिप्रस्थितो वर्णि: बङ्गदेशे सीरपुराधिपतिना

प्रार्थितः चातुर्मासमुवास । प्रवृद्धमासुरसङ्घं स्वमहसा विजित्य ततः प्रस्थितो बभूव तपस्वीजनसेवितः कामाक्ष्याः स्थाने पिबैकं संसर्गदोषेण शाक्तं वैदिक मार्गे संस्थाप्य नवलक्षाभिधमचलमधिरुह्य तत्रत्यान्नानंदयित्वाश्रमं कपिलस्योवास।

कपिलाश्रमं प्रस्थितः जगन्नाथपुरीयं प्रवृद्धासुरोन्मेषमुपशमयन् तत्रोवास वर्षपर्यन्तम् । ततः श्रीरङ्ग श्रीरामेश्वरादितीर्थानि सञ्चरन् मार्गे महारण्यमवाप तत्रालब्धफलकन्दसलिलः पञ्चमेऽह्नि कूपमेकमपश्यत श्रीहरिस्तत्रकूपाद् उद्धृत्य सलिलं यथा यथा स्नापयति स्म शालग्रामं तथा तथा तत्रैव सर्वं जलं व्यलीयत् इत्यवलोक्य पौनः पुन्येन सस्नाप । ततः नैवद्याय चिन्तयन्तं हरिमुमामहेश्वरौ ददतुर्नैवेद्यं सक्तुरूपम् । भगवते निवेद्य नैवेद्यं पार्वती परमेश्वरं तुष्टाव । अन्तर्हिते भगवति शङ्करे चरन् कन्याकुमारीक्षेत्रं, साक्षिगोपालक्षेत्रं चाभिगम्योत्तरं दिशि प्रतस्थे चन्द्रभागानदीतटं पुण्डरीकपुरतः दण्डकारण्यं प्रविश्य गोदावर्यां कृतस्नानः पञ्चवटीं जगाम । ततः त्र्यम्बकक्षेत्रदर्शनं कृत्वा सूर्यपुरसमीपे तापतीं नदीं प्राप्य कृतावगाहनः, भृगुनगरं प्रतिपयौ । भृगुनगरं निकषा नर्मदां संस्नातस्ततः महीं साभ्रमतिमुत्तीर्य भीमनाथगोपनाथादीन् तीर्थयन् मकरालयं (मांगरोल)प्राप ।

वि.सं. १८५६ कृष्णाष्टमी तिथौ ततो नातिदूरस्थं लोजाभिधपुरस्योपकण्ठे वापिकावेदिकां निससाद । समागताखिलपौरयोषितां कुतूहलं जनयामास । हृदि वृन्दावनेन्दुचिन्तयानं वापिकावगाहार्थागतेन सुखानंदेन दृष्टः, पृष्टश्च, कस्त्वं, कस्य शिष्य इत्यादि प्रश्नैस्तैर्थिकोऽहमित्युक्तेन तपस्वीप्रवरेण जाज्वल्यमानतेजसाभिभूतः सुखानंदः त्वादृशान् कृष्णभक्तानमस्मज्ज्येष्ठः मुक्तानंदः दिदृक्षतीति । श्रुतस्तवः योगीक्षां सर्वतीर्थफलं मत्त्वा जगामाश्रमम् । तत्रत्याः मुक्तानंद प्रमुखाः

**अहो तपस्विनो दृष्टा बहवो योगिनो भुवि ।**
**ईदृशस्तु न कोऽप्यैक्षि न श्रुतोऽप्यत्र साम्प्रतम् ॥**
**क्के दमुग्रं तपः क्के दं बालखेलोचितं वयः ।**
**तत साधरणो नायं पुमान् कोऽप्यस्ति देवता ॥**
**सूर्यश्चन्द्रोऽथवा वह्निः कुमारो वा नराकृतिः ।**
**श्रुतो निरन्नमुक्तो वा मूर्तितप एव वा ॥** [१]

इति व्यतर्किता दिष्ट्या दृष्टोऽयं तपोनिधि इति निजान्तःपुरे भाग्योदयं गणयामासुः । प्राप्तातिथ्यः सतीर्थ्यवत्सु सीदत्सु दृष्टाचारोऽपि ज्ञानं परीक्षेच्छया बुभुत्सुरिव जीवेश्वरमायाब्रह्मपरब्रह्मरूपाणि कानीति पप्रच्छ । गुरुमुखाद् यथाश्रुतं तथा कृतोत्तरेण मुक्तानंदेन संतुष्टः गुरुदिदृक्षया कतिपयमासान्निनाय तत्रैव श्रीहरिः

१- सत्संङ्गिजीवनम् १/५१/१७ तः १९

दूतेन ज्ञातसंवृत्तः स्वामिनोऽपि जगदुपकृतये परिगृहितमानुषवेशो भगवानिति ज्ञात्वातिप्रहृष्टः । पिपलाह्वये ग्रामे प्राप्ता दर्शनसेवापुरःसरां दीक्षां च स्वामिना रामानंदेन ।

ततश्चायं वर्णिवरेण्यः "सहजानंदः, नारायणमुनिः" इत्यभिधानं दधौ । अथैकदा जयन्तपुराभिधे ग्रामे-अयमेवोद्धवं सम्प्रदायं संरक्षितुं क्षमः" इति रहसि विचिन्त्याचार्यपदे नियोजयामास स्वामी रामानंदः । अनिच्छतोऽपि गुरुवचनस्यानुल्लङ्घनीयतया तद्वाक्यं प्रतिजग्राह । "**अदेयं नास्ति मे किञ्चित्तुभ्यं ब्रह्माण्डगोलके**[१] " इति गुरुवचनमाकर्ण्य –

**इह च यदुरु दुःखमन्तकाले ह्यगणितवृश्चिकदंशतुल्यमाहुः ।**
**यदितरदपि तच्च वैष्णवानां भवतु ममाथ च ते तु सन्त्वदुःखाः ॥**
**क्वचिदपि भुवि कृष्णभक्तिभाजां निजकृतकर्मवशादवश्यभोग्यम् ।**
**इह च यदुरुतथान्नवस्त्रदुःखं तदपि ममास्तु न तु प्रजेश तेषाम् ॥**[२]

इत्यश्रुतपूर्ववरान् सम्प्रार्थितवान् भक्तवत् ।

अथ सर्वतो गुणैरधिकं स्वमहसैव सर्वान् वशीकर्तुं क्षमं, ईश्वरोऽपि भक्त वद्वर्तमानं स्वपदे प्रतिष्ठाप्य फरेणिग्रामे सं. १८५८ मार्गशुक्लत्रयोदश्यां प्रतिरुद्धसकलकरणग्रामः परमात्मन्यनवधिकानन्दमये चेतसो निरोधं कृत्वा स्वैश्वर्येण योगीवज्जहौ भौतिकां कायां रामानंदस्वामी ।

अथ चोपगते स्वामिनि वियोगानलदग्धोऽपि कथमपि तदाज्ञया श्रीसहजानंद स्वामिनमाचार्यरूपेण मन्यमानाः सुखेन तत्पादच्छायायां न्यवसन् त्यागिनः गृहीणश्च शिष्याः स्वामिनो रामानन्दस्य ।

संसारार्णवनाविकः श्रीहरिः सधर्मभक्तिं प्रवर्तयन्, वाक्यसुधाभिः सदस्थान् तर्पयन् "जनसाहस्रयुगपत्समाधिस्थितिकारकः" इति ख्यातिमाप । अकृतविविधयोगसाधनोऽपि श्रीहरेर्वीक्षणमात्रेण सकलसमाधिसिद्धिमेति इति कुतूहलवशात्-श्रीवल्लभकुलाश्रिताः, निम्बार्कीयाः, माध्वाः, रामानुजीयाः, रामानंदीयाः, शाङ्कराः, सौराः, शाक्ताः, गाणपत्याः, शैवाः, त्रैवर्णिकाः, शूद्राः, योषाः, संन्यासिनः, वर्णिनाश्चातीतसंख्यां जग्मुः शरणं, समाधौ निजेष्टदेवं' विलोक्येदृगुत्कर्षणासहमानमेघजिददर्पभजंनेनातिचक्राम लोकख्यातिम् । दिनमेकं दिने त्रीणि वा दिनानि यथाभक्तजनमनोरथस्तथा निवसन् तत्र तत्र धर्मचक्रं प्रवर्तयामास ।

---

१- सत्संङ्गिजीवनम् १/४९/८०

२- सत्संङ्गिजीवनम् १/४९/८३-८४

वापीप्रतिष्ठापक: मकरालयत: कालवाणी, तत: युगपदेवाऽक्षयग्रामे पिप्पलग्रामे च निवसन् योगैश्वर्येण स्वाश्रितान् सुखयामासुस्तत प्रस्थाय मेघपुरं -मणिभद्रपुरं-भुजङ्गपुरं-कार्यायनादिस्वभक्तग्रामं विचरन् वि.सं. १८६१ तिथौ दुर्गपुरमाजगाम । ततस्तत्राभयेन राज्ञा जयारमाललितादितद्दुहित्रा च भृशं-सेवितप्रार्थितश्च भक्त्यावशीभूतोऽभवन्नारायण: दुर्गपुरं स्वगृहमवबोधयामास लोकानुग्रहहेतुनाऽन्यत्रगामिनातिथिवद् विचरणं कृत्वा दुर्गपुरं प्रत्यावर्तनं भवति स्म ।

सौवीरदेशाधिपते: सुरसिंहस्य प्रार्थनया मत्स्यपुरं गत्वाऽऽदर्श धर्मानुपादिदेश, तत: सिद्धपुरं गत्वा स्नात्वा बिन्दुसरोवरं श्रीनगरं च ययौ । श्रीनगराद् जयतलपुरं प्राप्य विष्णुयागरुद्रयागेनेयाज, दर्भावत्यां महाविष्णुयागं कृत्वाऽहिंसायज्ञप्रस्तोताऽभवत् ।

अथ कालेनाभये राज्ञि परमपदमधिगते गुणनाम्ना चोत्तमेन भक्त्यानुदिनं परिसेव्यमानो जातु मुनिपार्षदभक्तवृन्दै: वाक्यसुधातर्पिता सदस्या: बभूवु: । सुरवर्मणा संस्तुत: लोहाभिधपुरं समागत्य शाकसंस्कारनन्दितस्वक: वचनामृतानुद्घोषयामास । जीववर्मणा प्रार्थित: सारंगपुरमागत्योपदेशयामास वाक्यसुधामृतम् ।

ग्रामाद्ग्रामान्तरं विचरन् नानाव्रतोत्सवप्रीतभक्त: रहसि स्थित: स्वेनैव परित: प्रवर्तितं धर्ममवधृत्य तस्य नैरन्तर्येण संरक्षणाय गूढसंकल्पमकरोत् ।

**धृत्वावतारं यत्कार्यं तत्कृतं सकलं किल ।**
**तथापि भाविनां नृणां कार्यं किञ्चिद्हितं मया ॥**
**अन्तर्हिते मयि भुवो भक्ता एते च मच्छ्रिता: ।**
**निरालम्बा भविष्यन्ति कार्यं किञ्चित् च तत्कृते ॥** [१]
**एवं विचार्य भगवान् सर्वेषां स नृणां भुवि ।**
**व्यचिन्तयद् हितं त्रेधा दयावात्सल्यवारिधि: ॥**
**कारयित्वा मन्दिराणि तत्र स्वप्रतिमा अहम् ।**
**स्थापयेय ततस्ताश्च सेविष्यन्ते हि मानवा: ॥** [२]
**भक्तिमार्गस्य पुष्ट्यर्थं मन्त्रदीक्षा ह्यपेक्षते ।**
**अतो धर्मान्वये शुद्धे गुरुतां स्थापयेय च ॥**
**धर्मज्ञानविरक्तीनां भक्तेश्चावगमाय तु ।**
**ग्रन्थ कर्ता शतानन्दो मच्चरित्रोपबृंहितम् ॥** [३]

---

१- सत्संङ्गिजीवनम् ४/२४/७ त: ९
२- सत्संङ्गिजीवनम् ४/२४ /१०
३-सत्संङ्गिजीवनम् ४/२४/१२-१३

इति गूढं संकल्प्य स्वयं ''शिक्षापत्रीं'' लिलेख; षट्मन्दिराणि च कारयामास। शास्त्राणि च सत्संगिजीवनप्रमुखानि शतानंदमुक्तानंद-गोपालानंदनित्यानंदनिष्कुलानंदप्रभृतिभिर्लेखकैः लेखयामास । भ्रात्रोः रामप्रतापेच्छारामयोः पुत्रावयोध्याप्रसादरघुवीरावाचार्यपदे नियोजयामास वृतपुरे द्वेधा विभज्य भारतम् । श्रीनगरवृतपुरधवलपुरजीर्णदुर्ग-भुजङ्गपुरदुर्गपुरादिषु श्रीनरनारायणः, लक्ष्मीनारायणः, राधारमणः, मदनमोहन, श्रीगोपीनाथः प्रतिष्ठिता अभूवन्। तेषु मन्दिरेषु स्वस्य स्वरूपस्य प्रतिष्ठा च चकार वृत्तपुरे ''श्रीहरिकृष्ण'' नाम्ना। कालान्तरेणावशिष्ट-पञ्चसु मन्दिरेष्वपि श्रीहरिकृष्णस्य प्रतिष्ठाऽभवत्। इत्थं स्वावतारकार्येण संतुष्ट एकोनपञ्चाशदधिकद्विमासेन सहैकाहः भूमण्डलं स्वपद्भ्यां अलंकृत्य वि.सं. १८८६ ज्येष्ठशुक्लदशम्यां तिथावन्तर्दधौ दुर्गपुरे भगवान् श्रीस्वामिनारायणः ।

समासतः प्रोक्तमिदं चरित्रं, श्रीधर्मसूनोरिह यो मनुष्यः ।
पठिष्यति श्रोष्यति वापि भक्त्या, स लप्स्यते वै पुरुषार्थसिद्धम् ॥

## १.१८ अस्य दर्शनस्य देशिकास्तेषां रचनादिकञ्च ।

दर्शनस्यास्योदयो न पुराणकालोऽपि त्वाधुनिक एव। अष्टादश शताब्द्यां भगवत श्री स्वामिनारायणस्यावतरणेन साकमेवोदयः दर्शनस्यास्य। व्याससिद्धान्त बोधकेन भगवता श्री स्वामिनारायणेन प्रस्थानत्रयी भाष्यमकृत्वैव स्वोपदेशबलेन दर्शनमाविष्कृतं निजाश्रितान्तरे । यद्यपि तस्य चरित्रग्रन्थेषु सत्संगि जीवनप्रमुखेषूपदेशव्याजेन दर्शनव्याख्यानमभूत । श्री स्वामिनारायणदर्शनस्य सम्पूर्णं वैदिकत्वं तदीयवचनामृतग्रन्थादेव ज्ञायते । श्रुतिस्मृतिसूत्रग्रन्थाविरुद्ध पञ्चतत्त्वनिर्णयोऽस्य सम्प्रदायस्य प्रधानं वैशिष्ट्यं वर्तते । तदन्तेवासिभिर्महामुनिमुक्तानंदादिभिस्कृतं भाष्यादिकं सूत्रादिष्वपि तत्र तत्र स्वमतपुष्ट्यपि कृता वर्तते तैस्तैर्ग्रन्थकारैस्तत्त्वग्रे तत्त्वनिरूपणावसरे स्पष्टीभविष्यति। अधुना तेषां समासेन वृत्तं लिख्यते मया।

## १.१९ दार्शनिकः शतानंदमुनिः ।



श्री स्वामिनारायणदर्शनजगति विश्रुतानां परापराविद्याविद्योतितान्तःकरणानामग्रेसराः दार्शनिकसार्वभौमाः सन्ति श्रीशतानन्दमुनयः । भगवतःसहजानंदस्यैव कृपया लब्धार्षचक्षुषा शतानंदमुनिना रचिता ग्रन्था; दर्शनेऽस्मिन् व्याससूत्रायन्ते किल । तद्वृत्तं तद्रचितग्रन्थैरेवावगम्यते ।

**कोऽसौ शतानन्दमुनिः जातः कस्य वा सुतः ।**
**कथं चाप्रीणयद् विष्णुं क्वेदं व्यरचयत्स च ॥**[१]

इति प्रश्नोत्तररूपेणोल्लेखितं वृत्तमिदं सत्सङ्गिजीवने । तद्यथा अस्ति खलु पुरा ब्रह्मविदाग्रसरेण जनकेनाधिशासिता पुण्यतमा, त्रिभुवनप्रथिता च "मिथिला" नाम नगरी । नगर्यां तस्यामभूदतिधार्मिकोऽधीतषडङ्गवेदः सुचरित उत्तमश्लोकः श्रीहरिसेवासमाराधनतत्परो "विष्णुदत्तः"नाम विप्रकुलाग्रणीः । "**तं विष्णुदत्त-तनयं स्वगुरुं नमामि**[२]" इति वचनाज्ज्ञायते तस्यैव गृहे जग्राह जन्म शतानंदमुनिः ।आबाल्यादयं विद्याव्यासंगपरः धर्मैकनिष्ठः, शास्त्रव्यसनी चासीत् । पित्रा प्राप्तोप-नयनः पितुस्सकाशादेव विविधविद्याधिगन्ता बभूव । फलतो विषयतो विमुखो विष्णुभक्तिपरायणोऽभवत्, निजान्तः स्फुरणया 'देवा ब्रह्मचर्येण मृत्युमुपाघ्नत" '**यदिच्छन्तोब्रह्मचर्यं चरन्ति**[३]' इत्यादिवचःसु

---

१- सत्संङ्गिजीवनम् १/२/११
२- सत्संङ्गिजीवनम् १/२/५
३- भगवद्गीता ८/११

विश्वासतः परया भक्त्या श्रद्धया च परिगृहीतनैष्ठिकब्रह्मचर्यमहाव्रतोऽखिलै र्मनोवाक्कायकर्मभिः कृष्णाराधनसंरक्तः सन् श्रीमद् भागवत्पठनपरायणोऽभवत् । वेदशास्त्रपुराणपञ्चरात्राध्ययन-फलात्मिकापराभक्त्यभिवृद्धिर्जातानुदिनं माहात्म्यज्ञानपूर्विका। पारोक्ष्येण विष्णुं भजतस्य तस्यासीत् प्रत्यक्षेक्षणेषणा।

अथ रहस्येकदा सो पञ्चमस्कन्धार्थं मीमांसयावैन्नारायणस्योपास्यत्वं आकल्पान्तप्रत्यक्षत्वञ्च - सञ्जातशुभाध्यवसायः प्रत्यक्षदर्शनलालसः शतानंदो गृहबन्धुबान्धवान् सहजभावेन जहौ, निर्ययौ च तैर्थिकैः सह विश्वात्माश्रमं प्रति। कालेनाल्पेनाक्षयाख्यतृतीयायां त्रिलोकं पवित्रयन्त्याः विष्णुपद्याऽलङ्कृतं बदरिकाश्रमं प्राप। तत्राऽर्चारुपेण सन्निहितं नरसमेतं नारायणं प्रणम्य परमानंदमवाप सः ।

अथ गतवत्सु तैर्थिकेषु निवृत्तैर्थिककर्मषु नारायणं प्रत्यक्षीकर्तुं धृतदृढसंकल्पोऽभूत् । वल्गूवाक्यैः स्तवप्रियं संस्तुत्य कन्दमूलफलादिभिः शरीरयात्रां कुर्वन् बदरीशचरणपरिचरणपरायणो बभूव, तस्याराधनक्रमोक्तः सत्संङ्गिजीवने

**विधाय नैत्यकं कर्म प्रत्यहं पुरतो हरेः।**
**पपाठ दशमस्कन्धं सम्पूर्णं विधिवत्सुधीः ॥**[१]

एवं बदरीशमाराध्यमानस्य षण्मासाः व्यतीयुः । प्राप्तप्रबोधिन्यामेकादश्यां तिथौ नैत्यकं विधाय यथापूर्वं पाठपरायणः दिवसं नीत्वा रात्रौ जागरणं चकार । निर्व्याज भक्त्या प्रसन्नः दयालुर्नारायणः योगिभिर्ध्यानगम्यात्मीयवपु अदीदृशद्, दृष्ट्वा सहसाऽनेकदिवाकराभं बदरिपतिं समर्थाय चिन्त्य नत्वा धरण्यां निपत्य प्रेमाश्रुपूर्णनेत्रः पुलकावृताङ्ग बद्धाञ्जलिद्वन्द्वः '' **श्रीवासुदेव इह सर्वमुमुक्षुक्षेमाय निर्जरऋषिः... बदरीशमीडे** ।[२] इति स्तोत्रेण स्तौषीत् ।''

स्तुत्यातिसंतुष्टः स्तवप्रियो प्राह वर्णिन् ! प्रीतोऽहं वरय वरमभीष्टं मत्तः । पुराकल्पितां गोविन्दगिरामाकर्ण्याह-

**यदि प्रसन्नोऽसि विभो ! वरो देयश्च मे तदा ।**
**रक्ष मां स्वान्तिके नित्यं देहि सेवां त्वमात्मनः ॥**
**गुणगानं तवैवेह कर्तुमिच्छामि पार्श्वगः ।**
**साफल्यं येन वयसः शुद्धिः स्याच्चान्तरात्मनः ॥**
**सिद्ध्यैश्वर्यादीच्छा नास्ति, ग्राम्यसौख्य विरक्तोऽस्मीति ।**[३]

---

१- सत्संङ्गिजीवनम् १/२/३०
२- सत्संङ्गिजीवनम् १/३/ तः ८
३- सत्संङ्गिजीवनम् १/३/ १२ तः १४

नापेक्षितं भवेन्मुमुक्षो अस्मादधिकं किन्त्वधुना मुमुक्षुजनमनोरथपूरणाय धृतनरवपुः पश्चिमपाञ्चालदेशे दुर्गपुरे," श्री स्वामिनारायण नाम्ना प्रथितो निवसामि। ततस्त्वं तत्र मम मानुषरूपाराधनपरो भव, तत्रैव तेनैव रूपेण तवायं मनोरथः परिपूर्णो भविष्यति, भविष्यति च त्वं मम नृदिव्यचरित्रामृतगर्भमहनीयनिबन्धकर्ता। संभाष्येत्त्थमन्तर्दधौ दयालुर्नारायणः । पुलकिताङ्गः प्रहृष्टमनः, लब्धमनोरथः मुनिः त्वरया द्वादश्यां पारणां विधाय पाञ्चालाभिमुखं प्रतस्थे । गच्छता मुनिना मासद्वयेनाप्तं श्रीनगरं (अहमदाबाद) नाम गुर्जरदेशीयं नगरम् । पथि संघेन गम्यमानेषु विप्रेषु मिथोद्भूतां वार्तां शुश्राव ।

**नारायणावतारं तं दृक्ष्यामो मिष्टभोजनम् ।**
**कृत्वा धनं च प्राप्स्याम इति विप्रगिरोऽश्रृणोत ॥**[१]

पाञ्चालाद् दर्भावतीं पुरमागत्य यज्ञोद्यतः नारायणः । विप्रवचः श्रुत्वेमे नूनं ममेष्टदेवस्य वार्तां कुर्वन्तीति निश्चत्य तैस्साकं तद् दिदृक्षोत्कः मुनिः दर्भावतीं प्राप, ददर्श चोच्चसिंहासनारूढं चन्द्रद्युतिं वर्णिवेषं श्रीस्वामिनारायणम् । आनंदमूर्तिसहजानंददर्शनानन्दः दंडवत् भूमौ पतित्वा प्रणनाम। तपः पूतकायः मुनिवरः श्रीहरिणा सम्मान्य स्वान्तिके वासितः । तद्यशोवर्णनोत्सुकः मुनिः कालेनाल्पेनानभ्यस्ताष्टाङ्गयोगोऽपि श्रीहरिकृपया समाधिमाप। अद्राक्षीच्च प्राग्दृष्ट

बदरीश्वरम्। क्षणान्तेऽन्तर्हिते तस्मिन्नक्षरे स्थितं कृष्णमप्यैक्षत। न केवलं स्वरूपदर्शनमपि तु।

**जन्मकर्मादि तेषां च स्वस्यैश्वर्यं च सर्वशः ।**
**भूतं भवद्भविष्यं यत्तज्ज्ञानं प्रददौ प्रभु : ।**[२]

स्वं मैत्रेयमवैत्। तत आरभ्य सोऽपि सर्वज्ञोऽभूत्। तद्यशोवर्णनोत्कण्ठेच्छां प्रकटीचकार। आयाहि त्वं मया साकं दुर्गपत्तनं साफल्यमेष्यति तत्र त्वन्मनोरथः इत्यनुज्ञातः दुर्गपुरं जगाम शतानंदः ।

दर्भावती यज्ञकालादारभ्य शेषायुस्तत्रैव भगवता साकमेव व्यतीयुः तद्गुणगणजुगुम्फने।

**"यथाश्रुतं यथादृष्टं चरितं मम वर्णय ।**
**ज्ञानं त्रैकालिकं बुद्धौ भवत्येव तवानघ ॥**
**मनःस्थानप्यभिप्रायान् सर्वेषां वेत्स्यसि ध्रुवम् ।**
**न ते त्वविदितं किञ्चित् भवितातिप्रियोऽसि मे ॥**[३]"

---

१- सत्संङ्गिजीवनम् १/३/२३    ३- सत्संङ्गिजीवनम् ५/६६/२९-३०

२- सत्संङ्गिजीवनम् १/३/४०

इति हरिणानुशिक्षितः भगवद्दिव्यचरितामृतगर्भं धर्मज्ञानाद्युपदेशपरिपूर्णं सकलसुमनभिर्भवरोगप्रशमनं सर्वार्थसिद्धिदं सत्संगिजीवनाख्यं ग्रन्थं विरचन् -

**एकैकं च प्रकरणं**
**कृत्वा सम्पूर्णमीश्वरम् ।**
**तमेव श्रावयामास**
**निजावासस्थितं मुनिः ॥**
**स शुश्रावादरात्साकं**
**नित्यं स्वान्तिकवासिभि : ।**
**शुकानंदादिमुनिभिः तेन**
**तुष्टोऽभवद् भृशम् ॥**[१]

इत्थं ग्रन्थरचनाप्रवीणः शिक्षापत्री, तदर्थदीपिका, सर्वमङ्गलस्तोत्रम्-औद्धवसिद्धान्तः, हरिजयन्ति व्रतविधिः, इत्यादिकान् ग्रन्थान् लिलेख ।

नात्र दार्शनिकानां ग्रन्थानां समीक्षा क्रियते मया, तद्ग्रन्थानुसारमेवानुपदं दार्शनिकतत्त्वस्य विचेच्यमानत्त्वात् । नोल्लेखः तिरोधानविषये मुनेः सम्प्रदायविद्भिः कुत्रापि कृतः ।

---

१- सत्संङ्गिजीवनम् ५/६७/१८-१९

# १.२० दार्शनिको मुक्तानंदमुनिः ।



श्रीस्वामिनारायणाश्रितपञ्चशताधिकपरमहंसेषु प्रमुखोऽयं मुनिः दार्शनिकेष्वपि मूधर्न्य एव । ब्रह्मसूत्राणां भाष्यकर्ता चास्ति । भगवता गुरुपदपरिष्कृत: सतामग्रणी विजयतेतमाम् ।

अस्ति खलु महज्जनसेवितं '' अमरापुराख्यं'' ग्राम '' अमरेली'' जनपदान्तरे सौराष्ट्रप्रान्तान्तर्गतं, तत्राविर्बभूव वैक्रमेऽब्दे चतुर्दशाधिकाष्टदशशततमे (१८१४) अनन्तरामराधानाम्नो: दम्पत्यो: गृहे । महात्मना '' मुकुन्ददासः '' नाम्नाभिस्संस्कृतः । बालोऽयं सकलजनमनोनयनहारिण्यारूपसंपदा, बाल्योचितेन क्रीडया चाह्लादयामास पितरम् । आशैशवादयं ग्राम्यसौख्याद् विरक्त:, रक्तश्च परस्मिन् ब्रह्मण्यासीत् । प्राप्ते काले कौमारे पितु: सकाशादेवायमभ्यस्त सकलशास्त्र: कालेनाल्पेन पूर्वजन्मार्जितसंस्काराद् सद्विद्यासम्पत्तिं संस्कृतगुर्जरव्रजादिषु कवनशक्तिश्चास्य निसर्गत एवोद्भूता आसीत् । वयसा साकमनुदिनमेधते स्म साहजिकं विषयवैतृष्ण्यं श्रेयोमूलम् । उपचीयमानविरागवैभवोऽयं पित्रे रुचिकरो नाभूदपि तु चिन्ताविषयोऽभवत् । निर्वेदोन्मूलनायातिक्रान्ते कौमारे विवाहितोऽभूदयं बालक: । पुत्रोद्वाहोत्सवावलोकनाद् महद्सौख्यमभवन्मातापितरो: ।

गृहादचिरेणातिवैराग्यवेगाद् निश्चिक्रमिषोरपि आग्रहभरेणानिच्छतोऽपि गार्हस्थ्यमनुप्रविवेश मुकुन्द: । विवाहादनुदिनं वर्धते स्म चान्त:शोकवेग: । उन्मादप्रकटीकरणमेव निष्क्रमणस्योपायत्वेन स्वीचकार । **जानन्नपि हि मेधावीजडवल्लोकमाचरेदि** [१] **ति** संस्मरन्ननुदिनमनुक्षणमुन्मादाधीनो बभूव ।

---

१- सं.सो १/१०२ ( उपनिषद्वाक्यमहाकोष उद्धृतम् )

तदुन्मादव्याकुलैः गृहसम्बन्धिभिश्च निष्कामितो गृहाद् सद्गुरुमन्विष्यन्नयं ध्रागंध्रा-वांकानेर-सरधाराख्यग्रामेषु क्रमाद द्वारकादासः, कल्याणदासः, तुलसीदासाख्यानां चरणेषु प्रपेदे।

सरधारनगरमधिवसतः मुकुन्दस्य दैवाद्योगोऽभवदुद्धवावतारेण रामानंदमुनिना । तदाऽऽकृष्टचेतः तत्रत्यवैभवं तृणवद्विज्ञाय तच्छरणं जगाम । "नापरीक्ष्योपदेश्य" इति नियमानुसारेण रामानंदस्वामिना परिक्षितः शिक्षितोऽन्ते च दीक्षितोऽपि मुकुन्दः "मुक्तानंदः" संज्ञामध्यगात् ।

श्रीरामानन्दस्वामिचरणसेवैकपरायणोऽयं मुक्तानंदमुनिः निष्कामव्रतस्य पराकाष्ठामुपगतः ज्ञानिनामग्रेसरो निःसीमभगवद्भक्तिसम्पन्नः स्वामिचरणान्ते वसतां प्राप्नोति प्रामुख्यं प्रख्यातिं च नितरामचिरेण ।

पप्रथमंश्रीहरिः नीलकण्ठो मुनिना मुक्तानन्देनाचारज्ञानाभ्यां वशीकृतः लोजाभिधे ग्रामे बभूव । तत्त्वपञ्चकविषयमधिकृत्य पृष्टः सन्प्रश्नानामुत्तरं सच्छास्त्रानुगतेन सद्गुरुपरम्पराप्राप्तज्ञानेन च ददौ मुक्तानंदमुनिः । रामानंदस्वामिदर्शनात्पूर्वं नवमासपर्यन्तं मुक्तानंदमुनिनोक्त परिचर्यां दधौ नीलकण्ठः (श्री स्वामिनारायणः)। यस्तस्य शिष्यत्वेनाजगाम, तमेव नीलकण्ठं

दीक्षादानेनोपकृत्य रामानंदस्वामि निजाचार्यपदेऽभिषिक्तवान्, तदाप्ययं मुनि यावदायुषं दासवदाचरितवान्निति भक्तेः दासत्वस्य च पराकाष्ठा तस्मिन्नासीत्।

विद्वत्सभायां महत्यां वटपत्तने मुक्तानंदः श्रीहरिणादिष्टः । कलौ भगवदवतारनिषेधकर्तृन् वादिनः सद्युक्तिप्रयुक्तसच्छास्त्रशरजालेन निरस्य कलौ घोरेऽपि सम्भवति भगवदवतार इति सप्रमाणं व्यवस्थापि। अत्राधिकं शास्त्रार्थवृत्तं सत्संगिजीवनाज्ज्ञातव्यम्[१]।

मुक्तकण्ठं प्रशंसितो जनसंसदि मुक्तमुनिः मुक्तपतिना नैकवारम् । आदर्शभूतोऽयं परमहंसानाम्। यदा कदा यस्य कस्यापि निर्व्याजभक्त्यानुवृत्या तुतोष श्रीहरिस्तदायं मुक्तमुनिवन्मे प्रिय इति जगाद । भगवानिव पूजितो बभूव मुक्तमुनिः श्रीहरिणादिष्ट सत्सङ्गिभक्तैः। किमधिकं बहुना।

१८८१ विक्रमेऽब्दे श्रीहरिणादिष्टः। यावद् देहपातं भवता स्वसम्प्रदाय-स्वेष्टदेवप्रतिष्ठामाहात्म्यव्यवस्थापकानि निबन्धरत्नानि रचनीयानीति। सम्प्रदायपुष्टिं विचार्यानुज्ञप्तः श्रीहरिणा मुक्तमुनिः शिरसादेशमावहन् बहून् निबन्धान् व्यरचि। तत्र गीर्वाणवाण्यां

---

१- सत्संङ्गिजीवनम् प्र. ४/३४ तः३७ अध्यायेषु प्रपञ्चितमिदम्

(१) ब्रह्मसूत्रभाष्यम्
(२) सत्संगिजीवनमाहात्म्यम्
(३)निर्णयपञ्चकम्
(४) श्रीहनुमत्कवच मन्त्र तत्पुरश्चरणविधिस्तोत्राणि
(५) हनुमदष्टोत्तरशतनामावलिः ।

**भाषायाञ्च**

(१) कृष्णप्रसादः
(२) सतीगीता
(३) श्रीनारायणचरित्रम्
(४) मुकुन्दबावनी
(५) गुणविभागः
(६) पञ्चरत्नम्
(७) धामवर्णनचातुरी
(८) भागवतदशमस्कन्धपद्यानुवादः
(९) भगवद्गीतापद्यानुवादः
(९) शिक्षापत्रीपद्यानुवादः
(१०) वासुदेवावतारचरित्रम्
(११) कपिलगीता
(१२) अवधूतगीता
(१३) उद्धवगीता
(१४) विवेकचिन्तामणिः
(१५) नारायणकवचम्
(१६) धर्माख्यानम्
(१७) सत्सङ्गशिरोमणिः
(१२) वैकुण्ठधामदर्शनं इति । अन्यानि च सन्ति कीर्तनानि व्रजगुर्जरादिभाषायां निबद्धानि प्रकाशितानि-अप्रकाशितानि पुस्तकानि ।

गानवादननर्तनत्रिविधसंगीतज्ञोऽयं मुनिः सकलमुमुक्षुजन समादरणीयमहिमः श्रीहरिः सर्वदा सर्वथा संसेव्यमानो तदनुजगाम धामाक्षरं वि.सं. १८८६ अषाढकृष्णैकादश्यां तिथौ तद्वियोगमसहमानः ।

## १.२१ दार्शनिकः गोपालानंदस्वामीः ।



सकलसम्प्रदायाभिज्ञधुरीणः स्वामीपादाः भगवन्तं श्री स्वामिनारायणं विहाय सर्वातिशयं महत्त्वं भेजेऽस्मिन् सम्प्रदाये । त्यागीनां गृहिणामेव नापि त्वाचार्याणामप्युपरीष्टान्नियुक्तोयं मुनिः श्रीहरिणा । स्वैश्वर्यातिमहसा पृथिव्यां विमलां कीर्तिध्वजां चान्दोलयाञ्चकार ।

मुनिरयं जग्राह नृत्वं सप्तत्रिंशदुत्तराष्टादशशततमेऽब्दे वि.सं. १८३७ वर्षे विप्रगोत्रतिलकयोः मोतिरामकुशलाम्बयोः गृहे इडरप्रान्तान्तर्गते ''टोरडा'' ग्रामे । ''खुशालभट्ट'' इति बाल्ये ख्यातश्चायं मातापितृभ्यामुपलालितः बालसखाभिस्साकं स्वीयबालक्रीडया ''शामलाजी'' स्थितं भगवन्तमपि दीव्यति स्म । गर्भसिद्धोऽयं योगीराट् महसा यशसा चाल्पेन बाल्येनाप्यतिचक्राम सर्वान् । गर्भाष्टमे वर्षे पित्रोपनीतो सर्वज्ञोऽपि नाट्यन्-चतुरो वत्सरान् -वेदानध्ययमानश्च निजगृह एव अवर्तत । वेदाङ्गाध्ययनायाऽभ्यनुज्ञातः पित्रास्वग्रामसकाशादेव प्रख्यातपण्डितस्य समीपे निवसन् पपाठ । लीलामात्रेण भगवान्निव सर्वविद्यामधिजगाम । **ब्राह्मणेन निष्कारणं वेदोऽध्येयोऽध्येतव्यश्चेति वाचं**[१] श्रौतिं गिरामनुस्मरन् स्वगृहे पाठशालां विधाय छात्रान्नध्यापयामास । दर्भावतीनगरे सम्प्राप्त संतसमागम आपातरमणीयेभ्यः सुखेभ्यो विरक्तो बभूव ।

लोकातिशायिप्रतिभादर्शनज्ञातैश्वर्याः लोकाः'' योगीराट्'' इत्यन्वर्थसंज्ञां चक्रुस्तस्य । योगीन्द्रदुर्गमगतिर्माधवेन साकमयं क्रीडार्थमागच्छतीति प्रसिद्धितराम् । आसन्तसङ्गतेरयं हृदयकमलविनिहतभगवद्ध्यानैकपरायणो योगनिष्ठो प्रत्यक्षीकर्तुं विचिन्वति स्म । एकदा सहसा महसा सशब्देनाश्चर्यमयेन प्रलयान्तवदुद्भूतेन

---

१-शिक्षापत्री श्लोक -९३-अर्थदीपिकायामुद्धृतः

समे जनाः भयाभिभूताः। दिनान्तरे निजान्तरे प्रत्यक्षमैक्षन्त भास्करम् । अथ चानावृष्टिपीडितजनसमूहैरभ्यर्थितो दीनवचसा परया कृपयाविष्टो विश्वाधारं भगवन्तमवहितमनसास्तौषीच्च तम्। जना अभूवन् प्रत्यक्षीकृतयोगप्रभावाः मुनेः। सपदि वर्षासंबभूव महती।

कदाचिदेनं स्वपार्श्वनयनार्थं द्विजवर्यवेषधरः स्वयं श्रीस्वामिनारायणो जगाम। ''आगम्यतां मया साकं दर्शनाय भगवतः'' इति प्रार्थितः कृतप्रस्थानः टोरडातः''जयंतपुरं (जेतलपुर) उपेयाय । प्राप्ते च जेतलपुरग्रामे सहसान्तर्दधौ भगवन्नाश्चर्यं जनयामास विप्राय । स्वभक्तसेविताङ्घ्रिः उच्चरम्यसुशोभमाना-ऽऽसनेविस्तृते ददर्श देवाधिदेवम् । तत्राप्तदर्शनः ग्रन्थपठनहेतुः मुनिमुक्तानंदेन पाठितः ।

अथ चास्य श्रूयन्ते नानायोगप्रभावाः, तेषु द्वित्राऽत्रोदाहियन्ते आज्ञानुसारागतवटपत्तनः मुनिस्तत्रोवास यावत्कालपर्यन्तं तावात्कालं सदाशिवगृहे भोक्तुं गच्छति स्म । यदा यदा ययौ भोजनार्थं योगीराट् तदा तदा आययौ भगवानप्यनेन साकम्। यद् यद् भुङ्क्ते स्म खुशालः तत्सर्वं भगवानपि। ददर्शेदं योगीराजः, अन्ये च भगवता भूज्यमानं भक्ष्यादिकं पुनः यथाक्रमेण न्यूनीभवतीति विलोक्यते स्म।

परमहंसैरपरैरनुक्षणमवहितमनसा सम्प्रार्थ्यमानः श्रीस्वामिनारायणः खुशालभट्टाय भागवतीं दीक्षां ददौ-दधच्च ''गोपालानंद'' संज्ञा। तस्य प्रमुखत्त्वं परमहंसेषु चातिमहसा वर्धते स्म सद्भिरनुदिनं परिवृतो भगवदाज्ञया जीवानामुपकाराय ज्ञानामृतमभिवर्षं सत्संगिजनप्रचुरेषु ग्रामनगरेषु च भूयोभूयः धर्ममैकान्तिकं भक्त्यानुगृहीतं प्रवर्तयामास।

अथ चातीतकालानावृष्टिपीडितजनस्तवतुष्टः स्वैश्वर्यबलेन समारुतामुग्रां वृष्टिधारां कृतवानिति प्रथितमेव । भावनगरस्थद्विजगृहस्थित महाभारता ऽऽनयनसमयेऽपि योगप्रभावदयं मुनिस्तदानीतवान्। सूर्यपुरनिवासिनः पराशीक (पारशी) बालः वाचालंकृतः आजन्मतो वाग्विधुरोऽपि । अद्यापि तदीययोग प्रभावस्य प्रतीकमिव विराजते शार्ङ्गपुरे (सारंगपुर) साक्षाद् हनुमन्मूर्ति भूताद्युपद्रवनिवारणी भक्ताभीष्टपरिपूरणी चेति। स्यान्नाम सन्ति बृहद्ग्रन्थपरिमितानि योगैश्वर्याणि तस्य मुनेः । अपरश्चास्ति महद्वैशिष्ट्यं तद्वयं पठामः शतानंद मुनिग्रथितपद्यैः निम्नांकितैः

**स्वस्वधर्मे वर्तयितुं साधून् पद्गाश्च वर्णिनः ।**
**स गोपालानंदमुनिनं समाहूयाब्रवीद् वचः ॥**
**स्वस्वधर्मे स्थापनीयास्त्वयैते सकला अपि ।**

**अस्याज्ञां वर्तितव्यं भवद्भिर्मामकैर्मुनेः ।**
**वर्तिष्यन्तेऽन्यथा योऽसौ न मदीय इति ध्रुवम् ॥** [१]

शिरसागृहीताज्ञः आजीवनं प्रामुख्यमावहद् सम्प्रदायस्य । प्रणीतानि चानेकदर्शनोत्कर्षमयानि निबन्धरत्नानि । स्यान्नाम कस्यापि कियद्दर्पवैशिष्ट्यं किन्तु न कोऽपि श्रीमुनेरधिकतां गन्तुं क्षमः । प्रस्थानत्रयत्वेन प्रथितानामुपनिषद् भगवद्गीताब्रह्मसूत्राणां विवरणं सरलं-सरसं-सुगभीरं व्यरचीदिति न कथनीयं, समेषां सुमनसां विदितमेव । ब्रह्मसूत्रभाष्यं तु महामुनि मुक्तानंदेन रचितं किन्तु श्रीहरेराज्ञया ब्रह्मसूत्रगभीरार्थस्फुटकारिणी प्रदीपाख्यां वृत्तिं व्यरचित् स्वामी गोपालानंदः । अन्ये च निबन्धा (१) धर्मदेवपूजाविधिः (२) भक्तिदेवीपूजाविधिः (३) विष्णुयागपद्धतिः (४) विवेकदीपः (५) भक्तिसिद्धिः (६) श्रीकृष्णाभिप्रायबोधिनी-(एकादशस्कन्धटीका (७) श्रुत्यर्थदीपिका (वेदस्तुतिव्याख्या) (८) अन्वयार्थप्रकाशिका (९) शुकाभिप्रायबोधिका (भागवतद्वितीयस्कन्ध-व्याख्या) (१०) निगूढार्थप्रकाशिका (भागवतदशम-स्कन्धव्याख्या) (११) हरिभक्तनामरत्नावली (१२) पुराणोक्ता श्रीकृष्णपूजा (१३) हनुमत्पूजाविधिः (१४)जीवेश्वरादिपञ्चभेदनिरूपणम् (१५) पुरुषोत्तमनिरूपणम् (१६) वार्ताग्रन्थश्चेति सन्त्यस्य मनषीणिः ।

इत्थं ग्रन्थप्रणयन् पूर्वकं सत्संगकमलविकासनहेतुरयमपरभास्वानिव स्वमहसा यशसा च दिगन्तविश्रुतां कीर्तिमवाप । यद्यपि शतकद्वयव्यतीतेऽपि प्रत्यक्षमिवानुभवन्ति भक्ताः मुनेरस्य कीर्तिकथायाः सौरभम् । भगवद्वचनं शिरसोद्वहता मुनिनेकोत्तरसप्ततिवर्षपर्यन्तं ''कुर्वन्नेवेह कर्माणी' ति औपनिषद्वाग्सार्थीकुर्वन् परिश्चर्या कृता दर्शनस्य । भगवत्तिरोधानानन्तरं द्वाविशंतिवर्षपर्यन्तं सम्प्रदायस्यास्य प्रमुख-पदमलङ्कृतमिति न संदेहः । यद्यपि नियुक्तावाचार्यावयोध्याप्रसाद-रघुवीराविति सम्प्रदायग्रन्थानामुद्घोषस्तथापि तेषामप्युपरिकृतोऽयं मुनिः स्वयं श्रीस्वामिनारायणेन भगवतेति समेषामितिहासविदां सम्मतिः ।

यावदायुषमवहित मनसा भगवच्चिन्तनैकतानः योगीन्द्रः निजेच्छाधृतज्वरः वृत्तपुरीमुपाजगाम । सभक्तसंतपार्षदानां पश्यतामेव प्रकटीभूतं श्रीहरिकृष्णमीशं भावार्द्रचक्षुषा पश्यन् कर्णप्रियस्तुतिभिरभिष्टूय तेनैव साकमष्टोत्तरैकोन-विशंतितमेऽब्दे (१९०८) वैशाखशुक्लायां तिथौ पञ्चम्यां स्वात्रन्त्र्येणान्तर्दधे ।

श्री स्वामिनारायणदर्शनजगति अतिविशिष्टं स्थानं वर्ततेऽस्य मुनेः । तदुपकृतमिदं दर्शनं धर्मविशेषात् दर्शनत्वं जगाम ।

---

१-सत्संङ्गिजीवनम् ५/५५/२२-२३

# १.२२ श्रीरघुवीराचार्यः ।



सनातनधर्मपथसंरक्षणाय स्वसंस्थापित श्री स्वामिनारायणसम्प्रदायाचार्यपदे भगवता साक्षान्नियुक्तो प्रथम आचार्यः श्री रघुवीराचार्याभिधः। श्रीलक्ष्मीनारायण-देवपीठस्थानस्य प्रथमाचार्यः श्रीरघुवीराचार्यः श्रीहरेः भ्रातृव्यः। आचार्यमणेः श्रीरघुवीराचार्यस्य जन्मस्थानं स्वावतरणेन भगवता पावितोत्तरकोसलदेशान्तरगतं आमलीयाख्यग्रामं वर्तते। श्री स्वामिनारायणस्य भगवतः लघुभ्राता श्रीच्छारामस्य ज्येष्ठपुत्रस्य श्रीरघुवीराचार्यस्य जन्मसमयः वि.सं.१८६८ वर्षे फाल्गुनकृष्ण चतुर्थी। आशैशवादयं सत्यैकप्रियः सत्यधुरन्धर आसीत्, ''अष्टवर्षं ब्राह्मणमुपनयीत'' इति प्राप्तावसरे पित्रा यथाविध्यपुनितोऽयं बालो बालचन्द्र इव वृद्धिमुपाजगाम। पित्रानुशासितोऽयं कालेनाल्पेन वेदवेदाङ्गपारङ्गतो बभूव। सकृद्ग्राहीत्वेनायं गुरूणामत्यन्तप्रीतिपात्रो बभूव। चुम्बितयौवनोऽप्ययं ज्ञानेन वृद्धोऽभवदिति नात्युक्तिः। विद्यया साकं विनयेन परिपूर्णः विद्वन्मण्डलेऽग्रणीव व्यराजत।

मायाजितानंदेन प्राप्तस्वबान्धववृत्तः तत्पिता गुर्जरं प्रदेशमाजगाम वि.सं १८७७ संवत्सरे। बहुकालाऽनन्तरं स्वबान्धवं श्री स्वामिनारायणभगवन्तं भगवद्रूपेण सम्प्राप्य मुमोद। प्रमुदातिशयेनाहूतगृहकुटुम्बे श्रीरघुवीराचार्योऽपि गुर्जरप्रदेशमाजगाम। मन्दिराणि निर्मिय्य-प्रतिष्ठाप्य स्वस्वरूपाऽनन्तरं वृत्तालये श्रीस्वामिनारायणेनोद्धवसम्प्रदायस्य धर्मधूरं अयोध्याप्रसादाय-रघुवीराचार्याय प्रदत्ता। वि.सं. १८८२ कार्तिकशुक्लैकादशीतः श्रीलक्ष्मीनारायणदेव-पीठस्थानमाचार्यरूपेणालङ्कृतवान्। अस्याचार्यस्य व्यवहारकौशल्येन साकं महता यत्नेन सत्सङ्गसम्पत्तिः प्रतिदिनं विवर्धमाना दशदिक्षु समृद्धाऽभवत् -तत्तु तस्य जीवनवृत्तविस्तारविज्ञानाज्ज्ञायते।

भगवतः श्रीस्वामिनारायणस्याज्ञया ये ये परमहंसाः हरिभक्ताश्च भगवत आदेशमनुसरन्नासन् ते समे श्रीरघुवीराचार्यस्यादेशं शिरसा वहन्ति स्म। तदाज्ञया

परमहंसमण्डली नानादेशेषु विचरन्ति स्म । अयं चाचार्यो तत्र तत्र ग्रामेषूपदेशव्याजेन गच्छन् जनान्नानंदयन् स्वपदश्रियं विवर्धयामास । साम्प्रदायिकस्येतिहासस्यालोके न केवलं सर्वप्रथमोऽपि तु सर्वेश्रेष्ठो-प्रेष्ठो-ज्येष्ठोऽयमाचार्यः । तत्त्वनिबन्धनिर्माणेन साकं बहुषु मन्दिरेषु मूर्तिप्रतिष्ठापनेनाश्रितजनानां महतीं प्रीतिं लेभे ।

अनेन विरचितेषु निबन्धेषु ''श्रीहरिलीलाकल्पतरुः'' द्वादशस्कन्धात्मकः महानिबन्धः । यत्र भगवतः श्रीस्वामिनारायणस्य माहात्म्यं सविस्तरं वर्णितमास्ते । सर्वमङ्गल स्तोत्रस्य भावप्रबोधिनिव्याख्या जनमङ्गलस्तोत्रस्य भावार्थप्रकाशिका व्याख्या, शिक्षापत्रीभाष्यञ्चेत्यादिकाः महत्त्वपूर्णाःग्रन्थाः सन्ति । तत्र तत्रानुषङ्गिकरूपेणोद्घाटितमस्ति दर्शनरहस्यमिति समे जनाः जानन्ति । तस्य रचनाशैली शब्दे चार्थे गाम्भीर्यं बिभ्रति । निबन्धरचनायाः कार्यं कुर्वताऽनेनानेकेषु मन्दिरेषु महोत्सवपूर्वकानि प्रतिष्ठाप्रधानानि कार्याण्यपि कृतानि सन्ति । मन्दिरेषु प्राधान्येन वृत्तालये द्वारिकानाथस्य प्रतिष्ठामकारयत् । दुर्गपुरे रेवतीबलदेवयोस्तथा श्रीहरिकृष्णस्य प्रतिष्ठां कृतवान् । तथैव जीर्णदुर्गे -धौलेनगरे-भगवतः श्रीस्वामिनारायणस्य श्रीहरिकृष्णस्वरूपस्य प्रतिष्ठामकारयत । स्तम्भनगरे (खंभाते) हरिमन्दिरनिर्माणपूर्विका प्रतिष्ठाविधिकारिता । मोहमय्यां (मुम्बई) धराख्ये (धरगाम) वरयानाख्ये (बुरानपुर) सावदान (सावदा) मणिभद्राभिधे नगरे (माणावदर) यथाविधानं भगवन्मूर्तिं प्रतिष्ठापयामास ।

एवमनेन सुचारुविधिना सत्सङ्गस्य प्रसारं प्रचारं कुर्वताचार्येण आसमुद्रान्तसत्कीर्तिमाप्ता - स्वसेवाकार्यं विसर्जयन् वयसि चरमे भ्रातुष्पुत्रं निजतनयमभावेन स्वीकृत्य भगवत्प्रसादाचार्यमाचार्यपदेऽभिषिच्य पुरुषोत्तमाराधानपरायणो बभूव ।

अथ कालेनाल्पेन जीर्णवासखण्डमिव पाञ्चभौतिकं विहाय वि.स. १९१९ माघशुक्ल द्वितीयायां परमपदमवाप । तस्य नश्वरे देहे पञ्चत्वङ्गतेऽपि यशः शरीरं मयाऽप्यनुभूयते सर्वैः सत्सङ्गिभिः महापुरुषैः भक्तैश्च ।

# १.२३ दार्शनिकः नित्यानंदमुनिः ।



साम्प्रदायिकोऽयं व्यासः'' इत्युपाधिना विख्यातः श्री स्वामिनारायण दर्शनजगति । दर्शनोपकृतशास्त्रार्थव्याजेन बहुधा तत्र तत्र प्रत्यपीपदत नित्यानंदमुनिः श्रीस्वामिनारायणदर्शनस्य सर्वशास्त्रसम्मतत्वं सर्वतोऽधिकं महत्त्वञ्च ।

अस्ति खलु'' लखनौ''सकाशमेव ''दतीया'' इत्यप्रसिद्धोऽप्यतिपवित्रं चातुर्वर्ण्यजनसेवितो ग्रामः । तत्र निवसतोर्विरजाविष्णुशर्मणो दम्पत्योर्दौ पुत्रावभूतां, गोविन्दशर्मा - दिनमणिशर्मा चेति । तत्र पुत्रिणामग्रणी बभूव दिनमणिशर्मणा विष्णुशर्मा ।

पित्रा प्राप्तसावित्रिक उपनीतः सत् सपदि बाल्योचितक्रीडाविमुखः विद्ववज्जनसमागमोत्सुकः ज्ञानवापीमवाप्य गुरोः सकाशाद् वेदवेदाङ्गानि चाधीत्य पाण्डित्यमधिजगाम

**''नास्त्यकृतः कृतेन [१]''  ''तद्यथेह कर्मचितो लोक क्षीयते [२]''**
**''अन्तवदेवास्य तद्भवति [३]''  ''न ह्यध्रुवैः प्राप्यते ध्रुवम् [४]''**
**''ब्रह्मविदाप्नोति परम [५]''''  तमेव विद्वान् अमृत इह भवति [६]''**
**''क्षीणे पुण्ये मर्त्यलोकं विशन्ति [७]''**

श्रुतिस्मृतिवचसां तात्पर्यमीमांसया जातनिर्वेदः गृहक्षेत्रं परित्यज्य बदर्याश्रमं प्रतस्थे । तीर्थानटन् अन्वेषयति स्म भगवत्साक्षात्कारं कारयितुं क्षमं गुरुम् ।

अटाट्यमानोऽपरेषामिवाप नेष्टां शान्तिम् । स्वेप्सितार्थाऽलाभादनुदिनमेधते

---

१-मुण्डकोपनिषत् १/२/१२
२-छान्दोग्योपनिषत् ८/१/६
३- बृहदारण्यकोपनिषत् ३/८/१०
४- कठोपनिषत् २/१०
५- तैत्तिरीयोपनिषत् २/१/१
६-तैत्तिरीय आरण्यक ३/१/३
७- भगवद्गीता ९/२१

स्म निर्वेदम् – कदा साक्षात्करिष्यामि भगवन्तमिति प्रतिदिनं प्रतिक्षणं चिन्तयोद्विग्नचेता बभूव। जगन्नाथपुरी-सेतुबन्धप्रभृतितीर्थजातं चानुप्राप्याप्राप्य तत्राप्यात्मनो मनोरथं द्वारिकायात्रार्थं प्रतस्थे। द्वारिकां जिगमिषुः गुर्जरप्रदेशमागत्य विशनगरं प्राप्तस्तत्रोवास। तत्र कर्णाकर्णिपरम्परया श्रुत्वा विवेद साम्प्रतं भगवान् स्वामिनारायणस्वरूपेण गुर्जरप्रदेशं समलंकरोति।

प्राप्तसंगमः दिनमणिशर्मा'' प्रभूतानंद मुनिना। प्रभुतानंदप्रबोधितो दिनमणिशर्मा आश्वस्तहृदयोऽपि सपद्येव ततो प्रतस्थे भगवतः साक्षात्काराय। पुरात्पुरं ग्रामाद् ग्रामं व्रजंस्तत्र तत्र परिपृच्छन् ''ऊजा'' ग्रामस्थः श्रीहरिरिति शुश्राव – उपाययौ तद्ग्रामं लुलोक लोकाधिपतिं नयनाभिरामं श्री स्वामिनारायणम्। अस्तौषीच्च हे भगवन ! तवैषाकिञ्चनकिङ्करः , त्वदेकजीवितस्त्वदेकशरणः, त्वदैकशेष इति। स्तुवन्नैव दण्डवत्पतित्वा भूमौ प्रणनाम।

अथ सकलहृदयगुहाशयो भगवान् तदन्तरस्थमकृत्रिमां श्रद्धां, स्वस्मिंश्च प्रेमानुबन्धं विलोक्य समीपं गत्वा स्वागताभिनन्दनादिना आनंदयामास। अथ च दिनमणिशर्मा प्रहृष्टहृदयः श्रीहरिमनुध्यायन्, असकृन्नामामृतान्यास्वादयन् तच्चरणपरिचरणपरायणो बभूव। आशैशवात् त्यक्तगृहबन्धून् पारमैकान्तिक – –साधुदीक्षाविधानेन भागवतीं दीक्षां प्रापयामास परब्रह्मः। अद्यारभ्यः दिनमणिशर्मा ''श्रीनित्यानंदः'' इति संज्ञया प्रख्यातो बभूव।

अथ च भगवता श्री स्वामिनारायणेनायं मुनिः बाल्याभ्यस्तवेदवेदाङ्गोऽपि पुनः पण्डितप्रवरस्य सन्निधौ पाठितः। सोऽयं मुनिः नित्यानंदः भगवदनुग्रहैकविषयः सन् सकलदर्शनमर्मज्ञः प्रतिवादीभयङ्करश्चाभवत्। परमहंसमण्डले मान्यश्च बभूव।

अखिलजनश्लाघापात्रेण मुनिनानेनाध्यापिताः परमहंसाः रचिताश्च नैःश्रेयसकलकानि शास्त्राणि, उपदिष्टाश्च जनसंसदः विजिताश्च पण्डितमान्याः विद्वांसः। कर्णावतीवटपत्तनोमरेठदक्षिणभारतीयानां सांख्ययोगन्यायवेदान्त-मीमांसादक्षानां शास्त्रार्थप्रवीणानां पाण्डित्यमदमुज्जहास। आसीदुद्घोषस्तेषां पण्डितसदसि सति शास्त्रार्थे–युस्मासु मान्यवरेषु यस्य –यस्य यस्मिन् यस्मिन् शास्त्रे भवेद् परिचयस्तत्र तत्र तेने तेन क्रमादुघोषयन्तु सर्वान् प्रश्नान् भगवल्लब्धशुद्ध ज्ञानासीना विच्छेद्य स्वमतं स्थापिष्येऽहम् इति। तत्र तत्र वादसभासु यः कोऽपि यमप्रतिसमाधेयमाक्षेपं मत्त्वां वादाय महता सम्भारेण प्रतिभाबलेन मत्तः प्रवर्तते स्म, तत्र तत्र तत्क्षणमेव स पण्डितः मुनिनानेन नित्यानंदेन प्रगल्भवचनेन तर्कादिकुशलेन पूर्वपक्षांश एव आक्षिप्यमाणः स्वपरिगृहीतं पूर्वपक्षं द्रढयितुमक्षमो मूकीभूतवदनो विरमति स्म जल्पतः। व्यपेतपाण्डित्यमदाः प्रतिरुद्धवादगत्या–

वनतवदनाः सदसः समुत्थाय स्वस्वावासान् गच्छन्ति स्म ।

श्री स्वामिनारायणदर्शनजगति विख्यातोऽयं भटोद्भटः प्रतिवादिभयङ्करत्वेन । बहुधा प्रशंसंश मुनिमेनं श्रीहरिः । अथ चाचार्यपदेऽभिषिक्तः श्रीमद्रघुवीराचार्योऽपि स्वामिनमेनं श्रीलक्ष्मीनारायणमन्दिरकार्येषु -धर्मतत्त्वनिर्णयेषु चात्यधिकं मन्यते स्म । श्रीमहोद्धवसम्प्रदायस्यास्य व्यधायि नानाविधानि सेवाकार्याणि मुनिप्रवरस्तथापि नहि वैमुख्यं साहित्येषु दृश्यते । नानाव्यापारव्यापृतोऽपि मुनिरयं साहित्यस्यापि सेवां चकार । (१) शिक्षापत्रीः (गुर्जरानुवादः) (२) श्रीहरिदिग्विजयः (३) शाण्डिल्यसूत्रभाष्यम् (४) श्रीहरिकवचम् (५) श्रीहनुमत्कवचम् (६) दशमस्कनधस्य स्वसिद्धांतानुरूपा भाषाटीका। (७) पंचमस्कन्धस्य स्वसिद्धान्तानुरूपाभाषाटीकाः (८) भगवद्गीता-गुर्जरीभाषाटीका (९) कपिलगीता (१०) गुणविभागः (११) वैकुण्ठदर्शनम् (१२) अवतारचरित्रम् (१३) निष्कामशुद्धेः भाषानुवादः (१४) रुचिराष्टकादिकानि सन्त्यस्य ग्रन्थाः । श्रूयते महामुनिः मुक्तानंदः श्रीहरिणादिष्टः वृद्धत्वेऽपि प्रतिदिनं ग्रन्थान् लिखति स्म, तस्य वार्धक्यस्यान्ते च प्रार्थितः नित्यानंदेन मुनिना प्राह-भो स्वामिन्! भवत्कार्यमहं करिष्ये पूर्णम्, चिन्तां मा कुर्विति। तस्य साहित्यसेवायां श्रीहरिदिग्वजयः सर्वोत्तमं स्थानं धत्ते ।

यावदायुषं मनसा वाचा कर्मणा स्वसम्प्रदायस्थानेकविधा सेवा परिचरन्नयं मुनिः स्वातन्त्र्येण समेषां पुरस्ताद् वि.सं १९०८ मार्गशीर्षशुक्लाष्टमीतिथौ श्रीहरेर्धाम जगाम ।

स्वपाण्डित्येन दर्शनजगति सम्प्रदाये व्यासेति ख्यातोऽयं मुनिरद्यापि स्वग्रन्थैः दर्शनमेनं परिष्करोति।

अ.१

# १.२४ दार्शनिकः शुकानंदमुनिः ।



श्री स्वामिनारायणसम्प्रदाये शुक एवावतीर्णः पुनरिति ख्यातिमुपगतस्य, दक्षिणभुजायितः शुकानंदस्य दर्शनेऽस्मिन् महद्वैशिष्ट्यं वर्तते। दशाधिकसंस्कृत-प्राकृतग्रन्थानां गूर्जरगीरायामनुवादेन रचनाकुशलोऽयं मुनिर्पुपोष परम्परा। तद्वृतं यथा

अस्ति खलु भारतभूमिभागे वृत्तालयस्य समन्ताद् एव ''दर्भावती''(डभाण) नाम नगरी, यत्र कृतः महावैष्णवमखः श्रीहरिणा। तस्यामेव नगर्यां जगन्नाथ भट्टः नामासिदौदीच्यकु लावतंसः बालः। **कदा जनिं लेभे, कौ च मातापितराववि 'ति सर्वेभ्यो ज्ञातमेवास्ति।** बालचन्द्रवदनुदिनोपचीयमानोऽयं बालः'' अष्टवर्षं ब्राह्मणमुपनयीत'' इति वचनेन पित्रोपनीतः। तत्रैव कृतारम्भो विद्याध्ययनस्य कालेनाल्पेनाधिजगाम वेदवेदाङ्गशास्त्राणि च। संस्कृतभाषायामिव प्राकृ तेऽपि पाण्डित्यमवाप्य सच्छास्त्रसमाराधनतत्परोऽभूत्। बाल्योचितक्रीडाविरक्तः हरावासक्तः जगन्नाथः सकलश्रुतिसारं श्रीहरिं प्रत्यक्षीकृत्य कृत्कृत्यो बभूव। भगवच्चरणकमलाश्रयणत्वराविर्भूतः स्वगृहं विहाय दुर्गपुरं प्रतस्थे।

प्राप्तदुर्गपुरः जगन्नाथः कृपाकटाक्षेणावलोकितः श्रीहरिणा। दण्डवत् प्रणिपत्य स्वभक्त्युन्मेषाद् तच्चरणमकरन्दरसास्वादेच्छया दीक्षार्थं तुष्टाव। तत्प्रार्थनाप्रीतः श्रीहरि औद्धवीयां (साम्प्रदायिकाम्)दीक्षामददत्। मुक्तानंदमुनिना तस्य ''शुकानंदः'' संज्ञा श्राविता, श्रुतसंज्ञो प्राह श्रीहरिः - मुने ! मन्ये त्वयावगतमस्य प्राक्तनं जन्मवृत्तमिति, ध्रुवमयं शुकावतारः।

तदक्षरविन्यासकलाकौशल्येनातिप्रीतः परब्रह्म। मुनिमेनं निजान्तरंगसेवायां पत्रादिलेखने संस्थापितवान्। तदीयसेवया तुष्टो प्राह-कारियाण्याः तृतीयवचनामृते-

मुनिरयं मुक्तानंदस्वामीवदनुदिनमेधते, यस्मात्काला-दागतोऽस्मच्चरणसेवायां, तस्मात् कालतः प्रतिदिनं वृद्धिमेवाधिगच्छति । प्रतिदिनमयं मुनिर्भगवतः स्वामिनारायणस्य सन्तोषप्रदं करोति स्म लेखनमिति बाला अपि जानन्ति सम्प्रदाये। रात्रावपि लिखति स्म स्वामी । दुर्गपुर एकस्यां राकायां भगवति ब्रुवति लिखन्नासीत्तदा सहसा वाताहतोः प्रक्षीणतैलो वा दीपो निर्वाणमगात् । तस्मिन्नैव क्षणे भगवान् स्वदक्षिणचरणाङ्गुष्ठतः राकेशवच्छान्ततेजः प्रकटीचकार। तत्तजेसा शेषपत्रं व्यलिखदिति बहुजनविश्रुतं वृत्तमिदम् ।

अतिज्वरपीडितश्शुकानंदः पादमेकमपि चलनासक्तोऽभवत् । तदानीं श्रीहरिणादिष्टः मयोच्यमानं पत्रं लिख। कथमप्यहं लेखितुमक्षमः, ज्वराधिक्यात्। ज्वरेणानुदिनं पीड्यमानमेनं मुनिं श्रीहरिः प्रेम्णातिशयेन क्षणं निर्निमेषमीक्षितवान् । कृपामृतनिष्यन्दगर्भेणाम्बुजलोचनैर्तत्क्षणमेवायं मुनिर्व्यपगतज्वरोऽभवत् । व्यलिखच्चादेशः भगवतोक्तः । तदारभ्य तस्य मुनेः ज्वरपीडानिवृत्ता ।

भगवति चान्तर्हिते विरहानलपीडितस्य निरुजत्वं रुजायते स्म। गद्गद्वाग्भिः शुकानंदः मनसा प्रार्थयते स्म श्रीहरिम् । हे हरे ! भवान्मत्कृपयाद्यनिरुजत्त्वं मे त्वद्विरहे रुजायत एव तत्त्वं मामनुदिनं मम ज्वरपीडां देही'ति प्रार्थनानुरूपः प्राप्तज्वरः द्वादशवर्षपर्यन्तं प्रतिक्षणं ज्वरेण पीऽितोऽपि नाखिद्यत् निजान्तर इति। उमरेठादिग्रामेषु सत्सङ्गोत्कर्षेऽस्यैव मुनेर्प्राधान्यं श्रूयते।

अथ च भगवत् श्री स्वामिनारायणमुखकमलनिःसृतपीयूषसार-संग्रथनकर्मण्यपि प्राधान्यमभजत् शुकानंदस्वामी । पत्रोद्देशेन साकं मुनिना शुकानंदेन सत्संगिजीवनस्य ''हेतु '' टीका- विश्वमंङ्गल स्तोत्रम्, बुद्धिप्रदीप, प्रार्थनामालादिग्रन्थाः लिखिताः । अनुदितानि च भागवत्दशमस्कन्धः, हरिगीता-(सत्संगिजीवनान्तगतम्) धर्मामृतम् (सत्संगिजीवनान्तर्गतम्) इत्यादिकम् ।

भगवदभिमतपुस्तकसंरक्षकतया मुनिना शतानंदेन' शुकरक्षित-पुस्तक'' इति हि स्तुतः । आजीवनं सेवया -लेखिन्या च सम्प्रदायं संवर्ध्य १९२५ संवत्सरे मार्गशीर्षेऽमावास्यायां तिथौ वृत्तालये श्रीहरिकृष्णस्य दर्शनपुरःसरं स्वातन्त्र्येण योगिवज्जहौ पाञ्चभौतिकं शरीरमाप चाक्षरधाम ।

# १.२५ श्रीनिष्कुलानन्दमुनिः ।



सकलदर्शनदक्षविद्वत्सु विलक्षणोऽयं मुनिः । नाधिजग्राहाक्षरज्ञानं कदापि तथापि भाषाग्रन्थग्रथननिपुणोऽयं मुनिः द्वात्रिंशत्संख्याकान् ग्रन्थान् जुगुम्फ । देवभाषाऽनभिज्ञानां कृते श्री स्वामिनारायणीयदर्शनविज्ञानं दुरुहं भवेद्विना निष्कुलान्दमुनिनाः । भाषानिबद्धाः मुनिरचिताः ग्रन्थाः सर्वातिशयं महत्त्वं भेजेऽधुना ।

मुनिरयं सौराष्ट्रे जामनगरजनपदान्तर्गते ''शेखपाट'' ग्रामे वि.सं,१८२२ संवत्सरे रामस्य गृहे अमृतकुक्षौ जनिं संप्राप्य गुर्जरकुलं पवित्रीचकार । पित्रा लालितः 'लालजी' न लुलोभ गृहसंसारे । पूर्वसंस्कारबलात्स विरागः लालजी मुनिं रामानंदं संन्यासाय प्रार्थितः । कालेन सर्वं सम्पत्स्यत इत्याश्वासितोऽयं जनः। भगवता श्री स्वामिनारायणेन भुजनगरयात्रोपक्रमे तस्य श्वसूरग्रामे ''आधोइ'' नगरे सहसा परमहंसत्वेन दीक्षिते लालजी निष्कुलानन्देति संज्ञा लेभे। भगवदाज्ञापितो ग्रन्थजुगुम्फने स्वाक्षराज्ञानं निवेदितः निष्कुलान्दमुनिः । मामनुस्मृत्य लिखत्विति स्वेष्टवचनविश्वासतः मुनि अक्षरविन्यासायापि असमर्थत्वेऽपि नैकान् ग्रन्थान् लिलेख। गुर्जरगिरागौरवरूपाः ग्रन्था विद्यन्तेऽस्य मुनेः– स्नेहगीता, भक्तिनिधि, धीरजाख्यानम् इत्यादयः ।

ग्रन्थप्रणयनेन साकं स्वगुर्जरीयं कलाकौशल्यमपि सम्प्रदायसेवार्थं प्रकटी चकार। ''धोलेरा'' नगरस्थ मंदिरे अद्यापि मुनिनानेन निर्मितानि शिल्पस्वरूपाणि सन्ति । द्वादशद्वारात्मकदोलानिर्माणं त्वस्यातिख्यातिं जगाम सम्प्रदाये ।

ग्रन्थमन्दिरयोर्निर्माणनिपुणोऽयं मुनिरद्यत्वे विरागमूर्तिरिति ज्ञायते साम्प्रदायिकः । ग्रन्थे कट्वालोचना कुत्रचिज्जनानामतुष्टिकरा भवति, तथापि नानिष्टकरं किञ्चिदिति तदध्ययनाज् ज्ञायते।'' मनगंजन ग्रन्थोक्त मनोनिग्रहविज्ञानं

साधकानां कृतेऽतीवाद्भुतमास्ते । तद्रचनाऽद्यत्वे निष्कुलानन्दकाव्यम्'' नाम्ना संग्रह्य प्रकाशीतं वर्तते भक्तमण्डले । तद्रचिताः ग्रन्थाः

१.भक्तचिंतामणी
२. पुरुषोत्तमप्रकाश
३.स्नेहगीता
४. वचनविधि
५. सारसिद्धि
६. हरिबलगीता
७. भक्तिनिधि
८. धीरजाख्यान
९. हृदयप्रकाश
१०. मनगंजन
११. हरिविचरण
१२. हरिस्मृति
१३. गुणग्राहक
१४. कल्याणनिर्णय
१५. चोसठ पदी
१६. अरजीविनय
१७ अवतारचिंतामणि
१८. चिह्नचिंतामणि
१९. पुष्णचिंतामणि
२०. लग्नशकुनावली
२१. यमदंड
२२. वृत्तिविवाह
२३.शिक्षापत्री पद्यरूपा ।

इत्थं मंदिरग्रन्थसेवासंरक्तः जगद्विरक्तः मुनिरयं धोलेरा नगरे वि.सं. १९०४ संवत्सरे पाञ्चभौतिकं जहौ शरीरम् । तथापि यशसा ग्रन्थमहसा चाद्यत्वेऽपि वर्तते साक्षादिति साम्प्रदायिकानां विश्वासः ।

## १.२६ आधारानंद मुनिः ।



श्रीस्वामिनारायणदर्शनोत्कर्षाय यतमानेषु सत्सु श्री आधारानंद स्वामी अन्यतम एवाभाति। श्रीहरेः पञ्चशतपरमहंसेषु नैकाधिका विविधविद्याविशारदाः संतजना आसन् तथापि चित्रकलाकौशल्यपरिज्ञाता त्वेक एवाधारानंद स्वामीति समेषां सम्मतमेव। मुनिनानेन स्वकृतौ'' ''**श्रीहरिचरित्रामृत सागर**'' नाम्नि ग्रन्थे ब्रजभाषायां तज्ज्ञानां कृते दार्शनिकं तत्त्वमुद्घाटितमास्ते । साम्प्रदायिकं महाभारतमिव विराट्पुस्तकमिति वृद्धाः । नाधुना सम्पूर्णं प्राप्यते, अपूर्णमपि दीर्घतमं पुस्तकमिदम्।

कुलं पवित्रीचकार महामुनिरयं स्वावतरणेन गुर्जरम् । कदायं पुरुषो धरामलंचकारेति न ज्ञायते तथापि तज्जन्मभूः '' खोलडियाद'' आसीत् । प्रसिद्धं बाल्ये'' वीरजी'' इति नाम्ना जानन्ति स्म गृहकुटुम्बिमित्रबान्धवा एनम् पूर्वतपसाप्ततेजोऽयं समेषां विलक्षण एव प्रतीयते स्म। गतवति वयसि बिभेति स्म पिता, तदुपशमेन। ग्राम्यसौख्यविरक्तोऽयं सततमात्मानुसन्धानेन साकं श्रीहरिं भजति स्म । समुद्भूतनिर्वेदः ''वीरजी'' पित्रे संन्यासाय निवेदितवान् । स्वनिर्वेददाढ्र्येन गृहपरित्यागकृतनिश्चयः पित्रा बहुधोद्वाहाय मानितः। मुनिना मुक्तानन्देनापि मानितोऽयं स्वगृहाय न जगाम । श्रीहरिणा प्रीतेन दीक्षितः । श्रीमुक्तानंद स्वामी मुख्यशिष्यरूपेण ख्यातिं लेभे।

लेखनकलाकौशल्येनाऽयमनेकानां ग्रन्थानां लेखक आसीत् । श्रीहरि मूर्तिप्रतिकृतिकरेण चित्रकारः । तच्चित्रितः चित्रप्रतिमा नानारूपेणाद्यत्वेऽपि प्राप्यत एव । तेषां सर्वोत्कृष्टं कार्य'' श्रीहरिचरित्रामृत सागर'' नामको ग्रन्थो

वर्तते। ग्रन्थोऽयं पाण्डुलिपिरूपेण ''आचार्यग्रन्थागारे ''सुरक्षितो वर्तते। प्रकाशितं संक्षिप्तं गुर्जरानुवादं श्रीहरिप्रकाशशास्त्री महाभागैः पञ्चभागेषु । मूलमपि तैरेव किञ्चद् विद्याध्ययनकाले प्रकाशितमास्ते । 'विवेकदीपः' 'बोल्या श्रीहरि रे' इत्युभौ ग्रन्थावपि उक्तस्यैव ग्रन्थस्यांशौ । त्रिमासाधिकेन वर्षत्रयेण तैरिदं पुस्तकं लिखितमिति वृद्धाः। तत्र ९७३८९- दोहा -चोपाई, २३०९ तरंगाः- २८ पुराश्च वर्तन्ते। वरतालामदावादोभयोर्देशयोश्रीर्हरिजीवनपोथिका'' रूपेण मन्यन्ते बहुधा समैः सत्सङ्गिभिरिति।

ग्रन्थलेखनेन साकं चित्रचित्रणं अन्यत् 'कार्यं आसीत्तेषाम् । नेदं वक्तुं शक्यते यदयं मुनिः कदा स्वछत्रं जग्राह सत्संगत इति, तथापि १९१९ विक्रमाब्दया-वदासीदेवेति भगवत्प्रसादाचार्यपीठारोहसमारोहोपस्थितसतां मध्ये नामोल्लेखाज्ज्ञायते।

## १.२७ दार्शनिकः श्रीकृष्णवल्लभाचार्यः



भारतवर्षस्याप्रतिमपण्डितमण्डितः वैष्णवविद्वत्सार्वभौमः, महामहोपाध्यायः, दार्शनिकपञ्चाननः, षड्दर्शनाचार्यः, नव्यन्यायाचार्यः, सांख्ययोगवेदान्तमीमांसातीर्थः, पण्डितवर्यः श्रीकृष्णवल्लभाचार्यः, विश्वविश्रुतो विद्वानासीत । स्वामी श्रीकृष्णवल्लभाचार्येण श्रीस्वामिनारायणीयेषु दार्शनिकेषु सर्वतोऽधिकं ग्रन्थलेखनकार्यं कृतं वर्तते । भगवतः श्रीस्वामिनारायणस्योपासनादार्ढ्येन साकं दिव्यत्वे मनुष्यत्वं, मनुष्यत्वेऽपि दिव्यत्वभावप्रतिपादनं स्फुटं स्वामीपादै एव कृतं दृश्यते ।

तस्याप्रतिमप्रतिभया चकिता विश्वस्था विद्वांस आसन इति तस्याभिनंदनग्रन्थावलोकनाज्ज्ञायते । स्वामीवर्याणां प्रादुर्भावः महागुजरातप्रदेशान्तर्गतसौराष्ट्रप्रदेशे कुंकुमवापी-(कुंकावाव-जि. अमरेली) ग्रामेऽभवत् । वि.सं-१९६१ आश्विनकृष्णपक्षेऽष्टम्यां तिथौ शनिवासरे सूर्योदयात् प्रागेतेषां प्रादुर्भावः । एतेषां मातुर्नाम श्रीकम्भरादेवी । पितृनाम श्रीगोपालकृष्णः आसीत् । एतेषां बाल्यकालिकं नाम कुवरजित् इति ।

प्राप्त संस्कारोऽयं बालः दिव्यदेव इव व्यराजत् । नवमे वर्षे यज्ञोपवीताऽऽसाद्याक्षरज्ञानाप्तिस्तत्र गृहमधिवसता कृतानेन । चतुर्दश वर्षस्यापक्वावस्थायां वैराग्यपरिपाकेन गृहं परित्यज्य जीर्णदुर्गधाम्नि बालमुकुंददासस्वामीनामन्तेवासीत्वेन नैष्ठिकीं दीक्षामलभत । नैष्ठिकीदीक्षामवाप्य गुरुणादिष्टोऽयं संस्कृताध्ययनं चकार । न्याय-व्याकरण-वेदान्त-सांख्य-योग-मीमांसादि -शास्त्राणां तत्-तत् - शास्त्रधूरन्धरैरध्ययनं कृत्वाऽमिततेजता विद्वत्सु भास्कर इव व्यराजत । वैदुष्यमेव नासीत्सम्पत्तिरेतेषां, ते योगसिद्धा अप्यासन् । एतेषां विषये शताधिकाश्चमत्कारवृत्तस्तेभ्यः तेभ्यः भक्तेभ्यः श्रूयते ।

सर्वदिक्षु स्वपाण्डित्ययशवितानतृष्णारहितेऽपि संस्कृतव्याख्यान-प्रवचनादिकं चकारायं महामुनिः । श्रीहरिलीलाकल्पतरुः, सत्संगिजीवनम्, श्रीशिक्षापत्रीभाष्यादीनां ग्रन्थानां साम्प्रदायिकानां मासादिपारायणं चकार च । ग्रन्थान्नैकान् ज्ञानविलास-सुधासिन्धु-शिक्षापत्रीभाष्य-श्रीहरिदिग्विजयप्रमुखान् संशोधयामास। शताधिकसर्वधर्म संसत्सु प्रमुखपदमलंकृतवान् स्वामी। नैकानि सप्ताहपारायणप्रवचनान्यपि चकार। तथापि पञ्चपञ्चाशत्संख्याकाः ग्रन्थाः रचिताः। तेषां ग्रन्थानां मध्ये'' श्रीलक्ष्मीनारायणसंहिता षड्विशंतिसहस्राधिकलक्ष श्लोकात्मिका बृहत्तमा वर्तते। अस्य ग्रन्थस्यापरं नाम श्वेतायनसंहिता'' इत्यपि वर्तते । ग्रन्थकर्ता च श्वेतायनव्यासपदवीं लेभे । दार्शनिकतत्त्वविनिर्णयाय 'दर्शनतत्त्वसारः','श्रुतितात्पर्यनिर्णयः','पञ्चतत्त्वनिर्णयः', 'श्रीब्रह्मरसायन भाष्यम्','श्रीस्वामिनारायणदर्शनम्', 'श्रीस्वामिनारायणवेदान्तसारः', इत्यादिकाः ग्रन्था अनेन मनीषिणा विरचिताः समानोपकारकाश्च सन्ति ।

# दार्शनकानां परिचयः

| क्रम | नाम | पिता | जन्म | अ.वा. | स्थान | पूर्वनाम | प्रमुख ग्रन्था |
|---|---|---|---|---|---|---|---|
| १. | शतानंदः | विष्णुदत्त | – | – | मिथिला | – | सत्संङ्गिजीवन –हरिवाक्यसुधासिन्धुः श्रीशिक्षापत्र्यर्थदीपिका |
| २. | मुक्तानंद | आनंदाराम | १८१४ | १८८६ | (अमरापुर) (अमरेली) | मुकुन्ददासः | ब्रह्मसूत्रभाष्य रत्नम्ध, सत्संङ्गिजीवन महात्म्यम् |
| ३. | गोपालानंदः | मोतिराम | १८३७ | १९०८ | टोरडा (ईडर) | खुशालभट्ट | ब्रह्मसुत्रवृत्तिः, उपनिषद्भाष्यम् |
| ४. | रघुवीराचार्यः | इच्छाराम | १८६८ | १९१९ | आमलीया यु.पी. | – | हरिलीलाकल्पतरुः, शिक्षापत्रीभाष्यम् सेतुमालाटीका (हरिवाक्यसुधासिन्धुः) |
| ५. | नित्यानंदः | विष्णुशर्मा | | १९०८ | लखनौ (दतीया) उत्तरप्रदेश | दिनमणीशर्मा | हरिदिग्विजय, शाण्डिल्यसूत्रभाष्यम् |
| ६. | शुकानंदः | – | १९२५ | – | जगन्नाथ | – | ''सत्संङ्गिजीहेतुटीका'' ''विश्वमंगलस्त्रोत्रम्'' ''बुद्धिप्रदिप'' |
| ७. | निष्कुलानंदः | राम | – | – | शेखपाट (सौराष्ट्र) | लालजी | भक्तचिंतामणीः निष्कुलानंदकाव्य |
| ८. | आधारानंद मुनिः | हंसराज | – | – | खोडियार (सौराष्ट्र) | वीरजी | हरिचरित्रामृतसागर |
| ९. | श्रीकृष्णवल्लभाचार्यः | गोपालकृष्ण | – | १९६१ | कुलाववा (अमरेली) | कुंवरजीत | श्रीलक्ष्मीनारायणसंहिता, ब्रह्मरसायनभाष्य श्रीस्वामिनारायण दर्शनम् |

## १.२८ दर्शनस्य प्रमुखाः ग्रन्थाः ।

इत्थं सन्त्यनेकाः दर्शनरक्षोदक्षाः विद्वांसः । तेषामनुग्रहरूपाः ग्रन्थाः श्रीस्वामिनारायणसम्प्रदायं दर्शनवियन्मण्डले दर्शनत्वेन स्थापयिपुं क्षमाः । पप्रथमं त्वत्र ''वचनामृतम्'' वर्तते । शास्त्रार्कानुग्रहिता ग्रन्थाः जीवेशमायाब्रह्मपरब्रह्मेति पञ्चतत्त्वनिर्णायकाः सन्ति । त्र्यन्तप्रथित तत्त्वत्रयेन साकमीशब्रह्मेति तत्त्वे स्थापिते । शताधिकग्रन्थगौरवत्त्वेऽप्यत्र मया पञ्चतत्त्वनिर्णयोपकारकान् ग्रन्थान् प्राचीनान् प्रामुख्येनोल्लिख्यते । तद्यथा

शतानंदमुनिविरचितेषु ''श्रीमद् सत्संगिजीवन'' । मुक्तानंदमुनि विरचितेषु ब्रह्मसूत्र भाष्यम्, श्री गोपालानंदमुनि विरचितेषु भाष्यस्य प्रदीपवृत्तिः, पञ्चभेदनिरूपणनिबन्धः । श्री रघुवीराचार्य विरचितेषु, श्रीहरिलीलाकल्पतरुः, श्री शिक्षापत्रीभाष्यम्, नित्यानंदमुनि विरचितेषु, श्रीहरिदिग्वजयः, श्रीशुकानंदमुनिविरचितेषु, श्रीसत्सङ्गिजीवनस्य हेतु टीकाः'' श्रीकृष्णवल्लभाचार्यविरचितेषु च श्री स्वामिनारायणदर्शनादिकाः ग्रन्था दर्शनस्यास्य प्रमुखाः ग्रन्थाः वर्तन्ते । अत्राधस्तान्निरूप्यते कतिपयग्रन्थाः समासेन ।

## १.२९ श्रीशिक्षापत्री, तद्भाष्यञ्च

भगवता श्री स्वामिनारायणेनेयमादेशपत्री रचिता ।

''**लिखामि सहजानंद स्वामी सर्वान्निजाश्रितान् । नानादेशस्थितान्-शिक्षापत्रीं वृत्तालयस्थितः**''[१] । इति स्वयमेवोक्तं द्वितीयश्लोके भगवता । तस्य रचनातिलघुग्रन्थरूपेणेति तस्याकारावलोकनाज्ज्ञायते । द्वादशाधिद्विशत श्लोकात्मिका शिक्षापत्री सर्वसच्छास्त्राणां सारभूता भवति । तत्र सामान्यविशेषरूपेणाश्रितानां स्वीयानां धर्मनिरूपणं कृतमास्ते भगवता तद्यथा ।

१-१० - मङ्गलाचरणादिकं शास्त्रावतरणम्
११-१२१ - निजाश्रितानां समेषां कृते साधारणधर्मोपदेशः ।
१२२- साधारणधर्मोपसंहारः ।
१२३-१३२- आचार्यधर्मनिरूपणम् ।
१३५-१३४- आचार्यभार्याधर्मनिरूपणम् ।
१३४-१५४ -गृहीणां धर्मनिरूपणम् ।
१५५-१५६- धनाढ्यगृहीणां विशेषधर्मनिरूपणम् ।
१५७-१५८- राजधर्म निरूपणम् ।

---

१-शिक्षापत्री २

१५९-१६२- सधवास्त्रीणां धर्मनिरूपणम् ।
१६३-१७२- विधवास्त्रीणां धर्मनिरूपणम् ।
१७३-१७४- सधवाविधवास्त्रीणां सामान्यधर्मनिरूपणम् ।
१७५-१८७- वर्णीनां धर्मनिरूपणम् ।
१८८-१९६- साधूनां धर्मनिरूपणम् ।
१९७-२०२- वर्णीसाधूनां सामान्यधर्मनिरूपणम् ।
२०३-२१२-उपसंहार प्रकरणम् ।

ग्रन्थस्यास्यार्थदीपिकाभिधेया शतानंदमुनिरचिता टीका वर्तते । मुनिनानेन द्वादशाधिकद्विशतानां श्लोकानां टीकायां त्रिशताधिकग्रन्थानां प्रमाणवचांसि उद्‌धृतानि सन्ति । अस्योपरि चास्ति भाष्यं प्रथमाचार्यस्य श्रीरघुवीराचार्यस्य । तत्र विशेषेण देवतापितृयागार्थ [१]..इति श्लोकेऽहिंसाधर्मप्रतिपादनम् ।...हृत्स्थोऽणु [२]....इत्यत्र जीवस्वरूप निरूपणनम् । त्रिगुणात्मानमः [३]... इति श्लोके मायायाः वर्णनं वर्तते । हृदये जीववज्जीवे [४]...इति श्लोके परब्रह्मस्वरूपादिवर्णनं वर्तते । स श्रीकृष्ण परंब्रह्मेति [५]... श्लोके परब्रह्मणः जगत उभयविधकारणत्वादिसमर्तिथत्।

## १.३० श्रीमत् सत्सङ्गिजीवनम्..

त्रिकालज्ञेन मुनिना शतानंदेन भगवतः श्रीस्वामिनारायणस्याज्ञया रचितोऽयं श्रीमत् सत्सङ्गिजीवनम्" ग्रन्थः । श्रीहरिसन्निधौ निवसता शतानंदेन मुनिना धर्मज्ञानविरागभक्तिरसोपबृंहितं सरलं बोधगम्यं शास्त्रं भगवत्तुष्टये रचितमस्ति । पञ्चप्रकरणात्मकोऽयं ग्रन्थः । श्रीमदुद्धवसम्प्रदायापर नामधर्मेऽस्मिन् चरित्रग्रन्थेषु सर्वातिशयोऽयं ग्रन्थः । यथा वैष्णवानां श्रीमद् भागवतपुराणं, रामोपासकानां श्रीवाल्मीकि-रामायणम्, तथा स्वामिनारायणीयानां कृते ग्रन्थोऽयममृतरससम्भृतः मोक्षगर्भश्चेति श्रीहरिचरित्रसुधारसद्रवसंसिक्तमप्येतत् ग्रन्थो धर्मशास्त्रमिति ग्रन्थकारेण प्रत्यध्यायान्ते " इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे..विलिख्य ख्यापितम् । श्रीहरिजन्मादिलीलावृतवर्णनादियं चरित्रशास्त्रम् । तत्र तत्रानुषंङ्गिकरूपेणोपदेशमुखेन धर्मस्य विशेषेण प्रतिपादनाद्धर्मशास्त्रम् । शास्त्रमिदं

---

१-शिक्षापत्री १२
२-शिक्षापत्री १०५
३-शिक्षापत्री १०६
४-शिक्षापत्री १०७
५-शिक्षापत्री १०८

**इतिहासपुराणानां वेदानां सांख्ययोगयोः ।**
**स्मृतिनामपि सर्वासां वेदान्तस्य च भूपते ॥**
**अस्ति रामायणादीनां सच्छास्त्राणामिदं श्रुतम् ॥**
**साररुपमतिश्रेष्ठं भवभीतिनिवर्तनम् ॥**[१]

वर्तते इति मुक्तमुनिनोल्लेखितम्। शास्त्रस्यास्य श्रवणेन श्रोतृभिः सर्वशास्त्राणां रहस्यं बुध्यते । भवाम्भोधितितीर्षुणामयं नाविति तद्विदां वाचः । कलिमलपापौघप्रक्षालनाय मुमुक्षुभिः शास्त्रमिदं सदा सर्वदा सेवनीयं वर्तते । अतिदुर्गमं तत्त्वं जिज्ञासमानानामिदमतीवोपकारकमस्ति। श्रुतिस्मृतिसूत्राणामालोके समे स्वस्वमतं जानीयुरिति धियानिर्मितमिदम् । सत्संङ्गिजीवनं दर्शनसम्मतं पञ्चतत्त्वनिरूपकमपि वर्तत इति मुक्तमुनेरुद्घोषस्तद्यथा।

**ईश ब्रह्मपरब्रह्ममायाजीवात्मनामिदम् ।**
**अस्त्येवाज्ञानतिमिरध्वंसभास्करसन्निभम् ॥**[२]

विरचय्य यदा ग्रन्थकर्ता श्रीहरिं श्रावितवान्, तदा श्रीहरिणोक्तमस्य ग्रन्थस्य माहात्म्यं तद्यथा -"**रमणीयमिंद शास्त्रं सर्वशास्त्रशिरोमणिः**[३]" इति (२७) ग्रन्थकर्त्रा सम्पूर्णोऽयं ग्रन्थ एकैकं च प्रकरणं कृत्वा श्रीहरिं श्रावितः । अत ग्रन्थोक्तं सर्वं श्रीहरिणा श्रुत्वा स्वीकृतमेवेति न संशयः श्रीगोपीनाथमंदिरे दुर्गपुर एकान्ते निवस्य रचितोऽयं ग्रन्थः ।

पञ्चप्रकरणेषु गुम्फितेऽस्मिन् ग्रन्थे प्रथमप्रकरणे ग्रन्थकर्तुः परिचयपूर्वकं भगवतः श्रीस्वामिनारायणस्यावतरणं बाल्योचिता क्रीडा -श्रीहरिगीतोपदेशः, वनविचरणम् -लोजपुरतः उद्धवसम्प्रदाये प्रवेशः, श्रीरामानंदस्वामिनः शिष्यत्वस्वीकारः, तस्माच्च धर्मधुराप्तिपर्यन्तवृत्तं वर्णितमास्ते ।

द्वितीय प्रकरणे नारायणगीतोपदेशः, भगवता श्री स्वामिनारायणेन सर्वेभ्यो जनेभ्यो दत्तस्वेष्टदेवदर्शनरूप ऐश्वर्यलीला, ओजस्वत्यास्तटे षाण्णमासिकं यज्ञानुष्ठानम्, मणिभद्रपुरे लोभस्नेहरसमानादीनां विस्तारेणानुवादः, भुजङ्गनगरे श्रुतिस्मृतिवचनबलेनाहिंसयज्ञप्रतिष्ठापनम्, पप्रथमं दुर्गपुरागमनं, स्वमतपुष्ट्यै भगवतः तच्चरणसेवकमहत्तां सतां ग्रामाद्ग्रामान्तरं विचरणं, तत्रासुरजनपीडनम्, सिद्धपुरादि तीर्थविचरणं, चातुर्मास्यव्रतोपदेशः, जयतलपूरे कौलानां पराजयः दर्भावत्यां महाविष्णुयागानुष्ठानमित्यादीनां वर्णनं वर्तते ।

तृतीये प्रकरणेऽश्रुतपूर्वान्नकूटोत्सवस्याद्भूतवर्णनं द्रष्टिपथमायाति। तत्रोत्सवे

---

१-सत्संङ्गिजीवन माहात्म्य अ. १/२०-२१
२-सत्संङ्गिजीवन माहात्म्य अ. १/२४
३-सत्संङ्गिजीवन माहात्म्य अ. १/२७

सत्सङ्गदीप-स्पर्शास्पर्शविवेकमन्त्रजपविध्यादीनां वर्णनं, वृत्तालयादि गुर्जरदेशीयेषु नानाग्रामेषु विचरणम्, महादोलोत्सवाद्भुतरसेनोत्प्रेक्षणं विहाय मौलिकं वर्णनम्, मुमुक्षुस्त्रीणामपि ब्रह्मविदामपि पुरुषाणां सङ्गनिषेधः, वृत्तपुरे स्वजन्मोत्सवानन्तरं दुर्गपुरं प्रत्यावर्तनादिकमस्मिन् तृतीये प्रकरणे निरूपितं वर्तते।

चतुर्थे प्रकरणे पौराणिकेन पुराणश्रवणं वक्ताश्रोतादीनां लक्ष्माणि, सारङ्गपुरनिवासीनां प्रीत्यै जन्माष्टम्युत्सवः, लोहाभिधे ग्रामे शाकोत्सवः, पाञ्चालग्रामे रासोत्सवः, तत्रैव द्वैताद्वैतश्रुतीनां तात्पर्यनिर्णयः, आचार्यपदस्थापनं, दीक्षामहादीक्षाविधिः, व्रतोत्सवनिर्णयः, धर्मामृतोपदेशः, सृष्टिसर्गादिवर्णनं च सम्यक्तया वर्णितमास्ते ।

पञ्चमे पुनश्चान्तिमे प्रकरणे विस्तारेण कृता धर्ममीमांसा अवश्यतया ज्ञातव्या वर्तते । राजधर्मनिरूपणमपि विशेषेणोपादेयमस्मिन् समये । स्त्रीधर्माणां सधवाविधवापतिव्रतादीनां समासेनापि पूर्णं वर्णनं ध्यानाकर्षम्, प्रायश्चित्तादिरूपेणानुष्ठीयानां चान्द्रायणादीनां व्रतानां विधिः, योगसार,- ग्रन्थलेखनं तस्माच्च श्रीहरेर्प्रीत्यादिकं वर्णयित्वा ग्रन्थसमापनं कृतं वर्तते ग्रन्थकर्त्रा ।

## १.३१ श्री वचनामृतम्

श्रीवचनामृत प्रबन्धस्य भगवन्मुखचन्द्र स्त्रवितरसरूपत्वात् वेदवदकर्तृत्वमेवास्मिन् नये समेषां सम्मतम् । नानादेशेषूक्तोपदेशसुधारसार्द्रस्यास्य ग्रन्थस्य संकलन श्री मुक्तानंदस्वामी, श्री गोपालानंदस्वामी, श्री नित्यानंदस्वामी, श्रीशुकानंदस्वामी, एभिर्चतुर्भिर्मुनिभिः सम्मील्य कृतमास्ते । प्रकृष्टोऽयं भाषाप्रबन्धः विक्रमादित्यस्याऽष्टादशशताधिकषट्सप्तति (१८७६)संवत्सरादारभ्य अष्टादशशताधिकषडशीतिसम्वत्सर(१८८६)पर्यन्तोक्त भगवतः श्री स्वामिनारायणस्योपदेशवचसां संग्रहात्मकः ।

भाषावचनामृतसम्पादनार्थं मुनिभिरुक्तैः सहस्राधिकहस्तलिखितपत्राणि प्राप्तान्यासन्निति जनश्रुतिः । सहस्राधिकेभ्यः पत्रेभ्यः सम्पाद्य श्रीहरिं संदर्श्यानुमतिं लब्ध्वा द्विशताधिक द्विषष्टि (२६२)वचनामृतानां संग्रहो कृतोऽस्तीति सम्प्रदायविदां वाचः । तथापि श्री नरनारायणपीठस्थाः श्री स्वामिनारायणाश्रिताः द्विशताधिकत्रिसप्ततिसंख्याकानि (२७३) वचनामृतानीति प्रतिपादयन्ति । तत्संकलनकर्तृरुपेण च ब्रह्मानंदस्वामिनोऽपि नामोल्लेखो विद्यते । स्यान्नाम् संख्यानिर्धारणे वैमत्यं न तु वचनामृतेषु । अत्र विशेषण दर्शनदिग्दर्शनं वर्तते भाषायां सरलायाम् ।

श्री शतानंदस्वामिनास्य ग्रन्थस्यानुरूपमेव संस्कृतपद्यानुबद्धः

''श्रीहरिवाक्यसुधासिन्धुः'' इति ग्रन्थस्य लेखनं कृतमास्ते । श्रीरघुवीराचार्येण तस्योपरि सेतुमालाख्या टीका रचिता वर्तते । सर्वाधिकं परिपठ्यते ग्रन्थोऽयं दर्शनेऽस्मिन् । इति ।

## १.३२ श्रीहरिवाक्यसुधासिन्धुः

ग्रन्थोऽयं ''श्रीहरिवाक्यसुधासिन्धुः'' त्रिकालज्ञेन भगवल्लब्धवरेण मुनिवरेण्येन श्रीशतानंदेनैव विरचितः । मन्ये ग्रन्थोऽयं श्रीस्वामिनारायणदर्शन ज्ञानायाऽतीवोपकारकः। यथा शंकररामानुजमध्वनिम्बार्काणां मतविज्ञानं तेषां तेषां भाष्यस्याध्ययनाज्जायते तावदेव श्री स्वामिनारायणीयदर्शनस्य ज्ञानं ग्रन्थस्यास्यालोके जायते । भगवता श्रीस्वामिनारायणेनोपदिष्टामृतवचांसि समाकलय्य भाषायां महामुनिमुक्तानंदप्रमुखैः'' वचनामृतम्'' सम्पादितं वर्तते। समेषां विदुषां दर्शनतत्त्वजिज्ञासा तुष्ट्यै श्रीशतानंदेन मुनिना तदनुसारोऽयं ग्रन्थः '' श्रीहरिवाक्यसुधासिन्धुरिति प्रणीतमास्ते । ग्रन्थेऽस्मिन् द्विषष्ठ्यधिक द्विशत संख्याकाः तरङ्गा आलोक्यन्ते । तत्र

| **स्थानानि** | **तरङ्गसंख्या** | |
|---|---|---|
| दुर्गपत्तनीयप्रथमप्रकरणस्य | –अष्टसप्ततितरङ्गाः | –७८ |
| सारंङ्गपुरस्य | –अष्टादशतरङ्गाः | –१८ |
| कार्यायनस्य | –द्वादशतरङ्गाः | –१२ |
| लोहग्रामस्य | –अष्टादशतरङ्गाः | –१८ |
| पञ्चालग्रामस्य | –सप्ततरङ्गाः | –०७ |
| दुर्गपत्तनीयमध्यप्रकरणस्य | –सप्तषष्टितरङ्गाः | –६७ |
| वृत्तालयस्य | –विंशतितरङ्गाः | –२० |
| श्रीनगरस्य | –त्रयस्तरङ्गाः | –०३ |
| दुर्गपत्तनीयाऽन्त्यप्रकरणस्य | –एकोनचत्वारिंशत्तरङ्गाः | –३९ |
| | | २६२ |

''वचनामृतम्'' इवात्राप्यौत्तरीयाः-त्रिसप्ततिरधिकद्विशतान् तरङ्गान् - स्वीकुर्वन्ति ।

श्री स्वामिनारायणदर्शनाभिमतेऽस्मिन्नैव निर्दिष्टानां पदार्थानामाधिक्येऽपि मुख्यतत्त्वदृष्ट्या श्रीमुखेन भगवता श्रीहरिणा जीवेश्वरमायाब्रह्मपरब्रह्मात्मकानि पञ्चेति सप्तमेऽभिहितम् । विशेषेणास्य विस्तारपूर्वकं वर्णनमन्येष्वनेकेषु तरङ्गेषु प्राप्यते, तथापि, द्वादश, एकविंशति, एकचत्वारिंशत्, त्रिषष्टिः, त्र्यशीतिः,

पञ्चनवतिः,शततमः शताधिकपञ्चदशः,शताधिकविशंतिः, शताधिकचतुःचत्वारिंशत्, शताधिकत्रिषष्टिः, द्विशतः, द्विशताधिकषष्टि, द्विशताधिकैकषष्टिरित्यादयास्तरङ्गाः पञ्चतत्त्वमीमांसायां विशेषरूपेणोपयुक्ताः सन्ति ।

## १.३३ ब्रह्मसूत्रभाष्यं तद् वृत्तिश्च ।

यद्यपि सन्त्यनेकानि ब्रह्मसूत्राणां भाष्याणि, किन्तु श्री स्वामिना मुक्तानन्देन कृतं भाष्यं श्रीस्वामिनारायणदर्शनमनुगच्छति । भाष्येऽस्मिन् श्रीस्वामिमुक्तानन्देन जिज्ञासाधिकरणे ''अथ''पदार्थोऽस्ति विस्तरेण विवेचितः ।

ब्रह्मसूत्रग्रन्थोऽयं चतुर्ष्वध्यायेषु विभक्तो वर्तते । तत्र प्रथमाध्यायस्य नाम समन्वयाऽध्यायो विद्यते । अस्मिन्नध्याये सर्वासां कारणवादिनीनां श्रुतीनां परब्रह्मणः कारणत्वरूपेण प्रतिपादनं कृतं वर्तते । द्वितीयाऽध्यायोऽविरोधाध्यायो वर्तते । तृतीयाध्याये प्रतिपादितं यत् परस्य ब्रह्मणो जगत्कारणत्वप्रतिपादने कश्चनापि विरोधो नास्ति ।

चतुर्थाध्यायस्य नाम फलाध्यायः । अस्मिन्नध्याये चरमपुरुषार्थ मोक्षस्य विचारो वर्तते ।

यद्यपि विशिष्टाद्वैतमतं यथा रामानुजानुयायिभिः स्वीक्रीयते तथैव श्रीस्वामिनारायणीयैरपि स्वीक्रियते, तथापि भगवता श्रस्वामिनारायणेनोररीकृतं विशिष्टाद्वैतमतं श्रीरामानुजस्वीकृताद् विशिष्टाद्वैतमताद्, किञ्चद् विशिष्टमेव वर्तते इति भाष्यकर्त्रा द्वितीयाध्यायस्य प्रथमपादस्य द्वाविंशे सूत्रे सविस्तरं प्रतिपादितमस्ति ।

## १.३४ श्रीहरिदिग्विजय :

श्रीहरिदिग्विजयाख्योऽयं ग्रन्थः श्री नित्यानन्देन मुनिना विद्वद्धुरन्धरेण निर्मितः। एकोनपञ्चाशदुल्लासात्मकोऽयं ग्रन्थः । श्री स्वामिनारायणीयानामयं ग्रन्थोऽतिप्रियतमो वर्तते । ग्रन्थकर्तुः प्रत्यक्षे भगवति श्री स्वामिनारायणेऽतीव निष्ठासीत्तस्मान्निष्ठारसद्रवसंयुतोऽयं प्रबन्धः सर्वेभ्यो चरित्रप्रबन्धेभ्य उत्तमोऽस्ति । ग्रन्थकर्त्रा स्वयमेवास्य प्रामाण्यादिकमेवोल्लेखितं वर्तते, तद्यथा-

नित्यानंदेन मुनिना श्रीहरेः सहचारिणा ।
हरिदिग्विजयाख्योऽयं मया ग्रन्थो विरच्यते । ३-१-१७-१
इति लेखकस्यान्यत्वं निराकृत्य ग्रन्थनिर्माणस्थलनिर्दशति
श्रीहरिदि ग्विजयाख्योऽयं स्वामिनारायणाज्ञया ।
तदन्तिके स्थितिं कृत्वा कृतो दुर्गपुरे मया ।
निर्वेदितरचनानेन स्थलनिर्देशः । दुर्गपुरमधिवसतानेन मुनिनाऽयं ग्रन्थो

भगवदादेशवशाद्रचितः । ग्रन्थस्यास्य रचनया प्रीतः श्रीभगवान् स्वामिनारायण इति स्वयमेव ग्रन्थकर्त्रा निवेदित ।

ग्रन्थमिमं मया यो दृष्टवातिहृष्टो निजकण्ठदेशात् ।

उत्तार्य पुष्पसृज आदरान्ते कण्ठे न्यधादेष हरिः स तुष्यात् ॥ ३.४९-६८

ग्रन्थेऽस्मिन् नवदशोल्लासयोः समग्रं वेदान्तशास्त्रं निजनवनवोन्मेषशालिन्या प्रज्ञया जुगुम्फ नित्यानंदमुनि : । विशिष्टाद्वैततत्त्वप्रतिपादनं ग्रन्थकर्त्रा श्रीधर्मसूनोः वाराणस्यां शास्त्रार्थमुखेन प्रतिपादितमास्ते वेदान्तदृष्टयोक्तोल्लास-द्वयमतीववैशिष्ट्यमावहतः ।

## १.३५ श्रीहरिलीलाकल्पतरु : ।

द्वादशस्कन्धात्मकोऽयं "श्रीहरिलीलाकल्पतरुः" प्रबन्धः श्री स्वामिनारायणीय प्रबन्धेषु महत्तमः । श्रीरघुवीराचार्यवयोऽत्र भगवति रतिवृद्धिम भीप्सतां कृते रसालङ्कारपुरःसरं दिव्यमानुषी क्रीडां वर्णयति । अत एव ग्रन्थोऽयं- "सकलकोविदपङ्कजभास्करं परमभागवतव्रजसेवितम् "इति विदूषां वाचः । स्वभक्तमनोरथसिध्यर्थोऽयं ग्रन्थः कल्पतरुरिव सद्यामोघफलदः, अत एवान्वर्था संज्ञा "श्रीहरिलीलाकल्पतरुरि" ति ।

ग्रन्थस्यास्य रचना जीर्णदुर्गमंदिराऽमात्य श्री गुणातीतानंद स्वामीनः प्रेरणया श्रीहरेराज्ञागर्भकृपया च कृताचार्यवर्येण ।

ग्रन्थग्रथनविचारमग्नमाचार्यं स्वकीयदर्शनेन कृतार्थीचकार श्रीहरिः । तदुक्तम्

**सद्विचारमितिकुर्वति तस्मिन्प्रीत एव स तदाशयवेत्ता ।**
**श्रीहरिर्निजविधिप्रसिताय स्वीय दर्शनमदान्नृप तस्मै ॥** [१]

ग्रन्थेऽस्मिन् भगवतः श्री स्वामिनारायणस्य सर्वावतारीत्त्वं नैकधा प्रत्यपीपदत ग्रन्थकर्ता । तत्रापि नडियादनगरेऽद्वैतीनां सह शास्त्रार्थाऽवसरे प्रतिपादित त्रयोदशासाधारण लक्ष्माः, कारियाणि ग्रामे मुनिना गोपालानंदेनोक्ताविर्भावहेतुत्त्वेन षड्लक्षणानि ध्यानाकर्षाणि । यत्र तत्र सर्वत्रालङ्कारसाम्राज्यं दृश्यते ग्रन्थे । ग्रन्थस्य प्रमुखकर्तव्यं श्रीहरेः सर्वावतारीत्वस्थापनामिति हि ज्ञायते ।

---

१-हरिलीलाकल्पतरुः १/११/६

## १.३६ श्री स्वामिनारायण वेदान्तसारः

श्रीमद्दार्शनिक पञ्चानन -षड्दर्शनाचार्यः सांख्ययोगतीर्थ-नव्यन्यायाचार्यपण्डित श्रीकृष्णवल्लभाचार्यैः प्रणीतोऽयं "श्रीस्वामिनारायणवेदान्तसारः" नामको ग्रन्थ, अस्य दर्शनस्य परिचयात्मको ग्रन्थो विद्यते। येन प्रकारेण तर्कसंग्रहः, वेदान्तपरिभाषा, यतीन्द्रमतदीपिका, ग्रन्थाः बालबोधार्थं कृता अभूवन्, तेनैव प्रकारेणायं बालबोधार्थमेव कृतमित्याभाति।

ग्रन्थोऽयमेकादशप्रकरणेषु विभक्तो वर्तते।

तत्र प्रथमे प्रकरणे प्रकृतेर्निरूपणं विद्यते।

द्वितीये प्रकरणे कालस्य निरूपणं कृतं वर्तते।

तृतीये प्रकरणे जीवतत्त्वस्य निरूपणं कृतं वर्तते।

चतुर्थ प्रकरणे ईश्वराणां निरूपणं कृतमस्ति।

पञ्चमे प्रकरणे मुक्तानां निरूपणं कृतमस्ति।

षष्ठे प्रकरणे ब्रह्मतत्त्वस्यास्ति निरूपणम्।

सप्तमे प्रकरणे परब्रह्मतत्त्वस्य निरूपणमस्ति कृतम्।

अष्टमे प्रकरणे दिव्य विभूतेर्वर्णनमस्ति।

नवमे प्रकरणे ज्ञानस्य निरूपणं कृतमस्ति।

दशमे प्रकरणे गुणानां निरूपणं कृतमस्ति।

एकादशे च प्रकरणे सम्प्रदायस्य परिचयो विद्यते।

एतत्सर्व निरूपणं विशुद्धरूपेण श्री स्वामिनारायणदर्शनानुसारेण कृतं वर्तते। यद्यपि तत्र तत्र तेषां तेषां दार्शनिकानां मतस्य समालोचनमपि कृतं वर्तते पण्डितवरेण्येन। किन्तु प्रामुख्यं तु स्वसम्प्रदायाभिमतानां समेषां तत्त्वानां, सर्वासां मान्यतानां च प्रतिपादनस्यैव वर्तते।

यद्यपि सारग्रन्थोऽयमाकारेणातिलघुस्तथापि संक्षेपेणात्र समेषां स्वामिनारायणदर्शनाभिमतानां तत्त्वानामर्कोऽस्ति प्रतिप्रादितः सरलया गिरया। ग्रन्थोऽयं न हि केवलं प्रमेयाणामेवापितु स्वाभिमतानां प्रमाणानामपि स्वरूपं निरूपयति।

## १.३७ श्रीस्वामिनारायणदर्शनम्

श्रीस्वामिनारायणीयदर्शनतत्त्वास्याधुनिके जगति प्रचिख्यापयिषया ब्रह्मसूत्रकर्तुशैलीमनुसृत्य दार्शनिकपञ्चाननैः, वैष्णवविद्वत्सार्वभौम-सांख्ययोगमीमांसातीर्थैः पण्डितप्रवरैः श्री कृष्णवल्लभाचार्यैः चतुः प्रकरणात्मकं

''श्रीस्वामिनारायणदर्शनशास्त्रम्'' निर्मितं वर्तते। प्रथममौपनिषदं श्रौतं प्रकरणं वर्तते। प्रथमेऽस्मिन् प्रकरण एकविंशत्यधिकरणानि उपासनाधिकरणादारभ्य कल्याणाधिकरणपर्यन्तानि सन्ति। श्रौतस्मार्तवचसामविरोधरूपेण विशिष्टं प्रतिपादनमत्राशितिसूत्रैः ग्रन्थकृता कृतं वर्तते।

द्वितीये सुधासिन्धुपरावाङ् प्रकरणे एकोनसप्ततिसंख्यापरिमितान्यधिकरणानि सन्ति। भगवतः श्री स्वामिनारायणस्योपदेशवचसामालोके विद्वद्वरेण्यैः सूत्राधिकरणयोर्निर्माणं कृत्वा दार्शनिकं तत्त्वं वचनामृतानुसारं प्रतिपादितं वर्ततेऽत्र।

तृतीये तावत् दार्शनिकप्रातिभप्रकरणे चतुस्त्रिंशदधिकरणानि सन्ति। अत्रोपासकस्यान्तःसाक्षिदर्शन, देवताविद्योपासना मधुररसभक्तिब्रह्मसम्बन्धेऽप्यमोक्षः, ब्रह्मोऽहमिति साक्षात्कारः इत्यादिविषयाः प्रतिपादिताः सन्ति।

चतुर्थे पदार्थतत्त्वप्रकरणे व्यूहादिसत्यत्वाधिकरणादारभ्य तादृगाप्त्यधिकरणपर्यन्तानि एकोनषष्ट्यधिकरणानि सन्ति। सर्वस्य सत्त्वम्, एकोनचत्वारिंशद्द्रव्याणि -एकादशदृश्यगुणाः, चतुर्विंशतिकेवल गुणा-पञ्चक्रियाः इत्यादीनां न्यायशास्त्रशैलीमनुसरता श्रीकृष्णवल्लभाचार्येण वर्णनं कृतं वर्तते।

## १.३८ उपसंहार

दर्शनपरम्परा समासेनोल्लिख्यात्र विवेच्यमाण दर्शनस्य, तस्योद्गातुः भगवान श्रीस्वामिनारायणस्य; प्रमुखानां दार्शनिकानां संक्षिप्तवृत्तञ्चवर्णितम्। अग्रिमप्रकरणे विवेच्यमाणतत्त्वपञ्चकस्याधारभूतानि साम्प्रदायिकग्रन्थान्यपि निर्दिष्टानि।

वस्तुतस्तु नैकेषां संशोधकानां कृते विपुलसाहित्यं वर्ततेऽस्मिन् नये। डॉ. हरिप्रसाद ठक्करः, डॉ. रश्मि व्यास, डॉ. देवल्लभदासादयः स्वशोधग्रन्थैः दर्शनं पुपोष, किन्तु ते तत्त्वचर्चा न हि कुर्वन्ति। डॉ. अरूणा शुक्ला, डॉ. सजमू नटपिल्ले, राष्ट्रभाषायां दार्शनिकान् शोधग्रन्थान् निर्मितवन्तः।

प्रायः इतिहासरूपेण शोधग्रन्थानां निर्माणमाभाति। तत्त्वसमीक्षा पूर्वकं संशोधनमपूर्वमेवास्ति।यद्यपि श्रीकृष्णवल्लभाचार्यः ''श्री स्वामिनारायणदर्शनम्'' इति ग्रन्थमलेखिस्तथापि तत्तु व्यासशैलीमनुकरोति न हि शोधग्रन्थस्य। शोधग्रन्थानां यथा विधिरस्ति तथा तत्त्वमीमांसा डॉ. श्रुतिवल्लभदासैः स्वग्रन्थे कृतमस्ति। किन्तु तेषामयमाग्रहो दर्शं दर्शं द्रष्टिपथमायाति यदयं ''अक्षरब्रह्म'' दर्शननाम्ना ख्यातिं गच्छेत्।

''स्वपरद्रोह जननं सत्यं भाष्यं न कर्हिचित्'' इति शिक्षावचनमन्यथा ज्ञात्वा न वदति कोऽपि विषयेऽस्मिन् शिक्षावचनलोपभीत्या। किन्तु ग्रन्थोक्तान्

दार्शनिकान् विहाय सर्वे तत्त्वमीमांसामुपेक्ष्य अवर्तन् । परितापविषयोऽयं नास्मिदीयानां साम्प्रदायिकानां विदूषां दर्शनोत्त्कर्षाय प्रवृत्तिः एकाधिकग्रन्थानामालोके तत्त्वमीमांसया दर्शनप्रदर्शनं शक्यते विदुषां पुरस्तात्। स्यान्नाम कालान्तरेण केचिद् दाक्षिणात्याः पण्डिताः स्वसिद्धान्तानुकुलोऽयं सम्प्रदाय इति शिक्षयामासुः । तेषामुपदेशप्रभावप्राहताः साम्प्रदायिका अपि विद्वासः दर्शनमिदमभिन्नं रामानुजदर्शनादिति उच्चैर्जगाद । उभयो ऐककण्ठयं श्रुण्वता मया गुरुजनानां सकाशाद दर्शनग्रन्था पठिताः । तत्र पञ्चतत्त्वानां निरूपणं दृष्टिपथमगमत। किञ्चिद् वैशिष्टयविशेषं ज्ञात्वां प्रवृतोऽहमत्र तत्त्वविनिर्णयाय। भगवता श्री स्वामिनारायणेनोपदिष्टं तत्त्वपञ्चकविज्ञानं सर्व विलक्षणमपि वेदसम्मतमस्ति ईश्वर-ब्रह्मतत्त्व समालोचना अश्रुतपूर्वा वर्तते । सर्वमिदं तत्तत् प्रकरणेषु प्रपञ्चितमस्ति । जीवमायापरब्रह्मतत्त्वमीमांसायां रामानुजमनुकरोती त्याभाति तथापि परब्रह्मणः रूपस्वरूपयोर्भेदः स्वीक्रियन्ते विशिष्टाद्वैतिभिर्यत् तन्नहि स्वीक्रियते दर्शनेऽस्मिन्। उभयोर्मतयोः समीक्षात्मकमध्ययनमपि भाव्यम्। मयात्र मिथः समीक्षां विहायोपनिषद् ब्रह्मसूत्रपुराणसम्प्रदायग्रन्थैः पञ्चतत्त्वपतिपादनाय विशेषण यत्नः कृतः । पञ्चतत्त्वेष्वपि ''ईश्वर,'' ''ब्रह्म'' प्रतिपादनं ध्यानाकर्षकमस्तीति न श्वश्लघा।

दर्शनवियति विततोऽयमर्थवादः- यदीश्वरब्रह्मशब्दाभ्यां परब्रह्मणो निर्देश इति। दर्शनेऽस्मिन् ''ईश्वर'' ''ब्रह्म'' ''परब्रह्म'' एतेषां पृथक्त्वेन स्वीकारः । क्वचिच्च पर्यायरूपेणः निर्देशेऽपि नहि तत्त्वत ऐककण्ठयमिति दर्शनदक्षाना-मुद्घोषः।

श्रीमद् रामानुजाचार्याः तत्त्वत्रयस्य निरूपणमकरोत्, स्वकीये श्रीभाष्यग्रन्थे, प्रत्यपीपदच्च विशिष्टाद्वैतत्वं परस्य ब्रह्मणः । तस्माद् बहोः कालादनन्तरं श्री स्वामिनारायणस्य भगवतः दर्शनवियन्मण्डल उदयः संजातः । परञ्चायं भगवान् श्री स्वामिनारायण उपनिषदामेव समालोचनं कृत्वा तत्त्वपञ्चकस्य प्रतिपादनमकार्षित्। तानि च पञ्च-संख्याकानि सन्ति। तद्यथा

**१. जीवः २. ईश्वरः ३. माया -( प्रकृतिः ) ४. ब्रह्म ५. परब्रह्म** चेति। पञ्चसंख्याकानां तत्त्वानां शास्त्रीयं विवेचनं समासेन अत्र प्रस्तुयते।

तत्त्वमीमांसोद्यतानां प्रायः तत्त्वत्रयस्वीकरणं द्रष्टीपथमायाति । औपाधिकभेदाभेदवादिभास्कराचार्यः, स्वाभाविकभेदाभेदवादिनिम्बार्क : अचिन्त्यभेदाभेदवादिचैतन्यमहाप्रभुप्रभृतय आचार्यचरणास्तत्त्वत्रयमुररीचक्रुः, जीवेशमायेति । न चिन्तयामासु आचार्यास्तत्त्वत्रयादाधिक्यं, किन्तु जीवे

शमायाब्रह्मपरब्रह्मेति तत्त्वपञ्चकमुद्घोष्य स्थापितवान् भगवान् श्रीस्वामिनारायणः दर्शनजगत्यश्रुतपूर्वमिवाभाति, तथापि श्रुति मूलकत्त्वान्नानादरणीयम् । तत्त्व पञ्चकमीमांसा प्रस्तुता महाविदूषा श्रीकृष्ण वल्लभाचार्येण –

१. जीवात्मा नित्यः, आजीवनस्मृतिमत्वात्, पूर्वजन्मसंस्कारोत्थाद्य-क्रियानुकूलस्मरणवत्त्वात् ।

२. ....अत एव प्रवाहगतब्रह्माण्डानां प्रवाहस्यानादित्त्वेन तद्रक्षकसंहारकेश्वराणामप्यनादित्वम् ।

३. ततो ब्रह्माण्डादिकारणात्मकमायाया अप्यनादित्त्वम्

४. तस्याः सृष्टिप्रयोजक ब्रह्मणोऽप्यनादित्त्वम् ।

५. तच्छरीरिणः परमात्मनोऽपि सृष्टिप्रवाहादिनिरीक्षकतयाऽनादित्वं सिद्धयति । अन्यच्च-

जीवेश्वरमायाब्रह्मपरब्रह्मेतिपञ्चभेदा अनादयः, जीवात्मतत्त्वं ज्ञानघनात्मकं ज्ञानवच्च, ईश्वरात्मतत्त्वमैश्वर्यघनात्मकं चमत्कारसंभृतं च, मायातत्त्वज्ञानात्म कभावघनात्मकं छायाजाड्यसंभृतं च, ब्रह्मतत्त्वं प्रकाशघनात्मकं संचाञ्चल्य चैतन्यप्रेरकं च, परब्रह्मतत्त्वं आनन्दघनात्मकं स्वेतरसमस्तनियामकं चेति ।

स्वरुपस्वभावगुणतश्च भेदानां सिद्धत्त्वाद्दर्शनमिदं नवीनमपि पुरातनमेव । **''द्वा सुपर्णा सयुजा सखाया ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे '' ''नित्यो नित्यानाम् ''** इति श्रुतितति: जीवपरमात्मनोर्भेदं व्यनक्ति । **''तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ''** इत्यादिश्रुतिभिर्व्यक्त ईश्वरपरमात्मनोभेदः ।'' **मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्** '' '' **भोक्ता भोग्यं प्रेरितारं च** '' इत्यादिभिः मायापरमात्मनोर्भेदः ज्ञायते । '' **दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यान्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः'' ''ब्रह्मविदाप्नोति परम्'' ''यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः** '' इत्यादिना ब्रह्मपरब्रह्मविषयको भेदो भवति ज्ञातः ।

दर्शनस्यास्य सर्वतोऽधिकं वैशिष्ट्यमस्ति-जीवेश-मायाब्रह्मपरब्रह्मणः श्रुतिस्मृतिसूत्राणामविरुद्धत्वेन प्रतिपादनम् । ग्रन्थानां परिचयः कारितः । चरित्रग्रन्थेषूपदेशव्याजेन ग्रन्थकर्त्रा दर्शनार्कः वर्णितस्थापि पं. श्रीकृष्णवल्लभाचार्येण निर्मितं ''श्री स्वामिनारायणदर्शनम्'' पुस्तकमतिमहत्त्वपूर्णमास्ते । तस्मादपि दर्शनोद्गात्रोक्तं ''वचनामृतम् ''सर्वसम्मतं सर्वश्रेष्ठञ्चास्ति । अतोऽत्र निबन्धे श्रुतिस्मृतिपुराणसूत्रग्रन्थैः सह साम्प्रदायिक ग्रन्थानामालोके जीवेशमायाब्रह्मपरब्रह्मणः वर्णनमग्रे करिष्यामि ।